CC-0. In Public Domain. Digitization by eGangotri

2
Copy
11
47

'मास्टर' मणिमालायाश्चतुरशीतिसंख्याको मणिः (न्यायविभागे ३)

श्रीः

जागदीशी

सिंहव्याघ्रलक्षणम्

तर्कतीर्थन्यायाचार्य्यश्रीवामाचरणभट्टाचार्य्यविरचितया
विवृत्या मनोरमया च
समुद्भासितम्

मास्टर खेलाड़ीलाल ऐन्ड सन्स
(कचौड़ीगली, बनारस सिटी)
इत्येतैः प्रकाशितम्

मूल्यं अष्टाणकाः

१९३७

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Master Manimala Series No. 84 (Nyaya Section 3)

THE
SINHA-VYÂGHRA-LAKSHHANAM.

OF

M. M. SHRI GANGESHOPADHYAYA.

WITH THE COMMENTARIES

Didhiti, Jagadishi, Viwriti, and Manorama.

BY

M. M. SHRI RAGHUNATHA SHIROMANI,
M. M. SHRI JAGADISHA TARKALANKAR.
Nyayacharya-Tarka-Tirtha Shri Vamacharana Bhattacharya.

EDITED BY

SHRI VAMACHARAN BHATTACHARYA.

First Edition.

PUBLISHED BY

MASTER KHELARILAL & SONS.

SANSKRIT BOOK DEPOT,

Kachauri *Gali, Benares City.*

1937

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[*All Rights Reserved for ever by the Publisher*]

Publisher—J. N. YADAVA Proprietor, Master Khelarilal & Sons.,
Sanskrit Book Depot, Kachauri Gali, Benares City.

Printer—N. R. Soman, Shri Lakshmi Narayan Press,
Benares City.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'मास्टर' मणिमालायाश्चतुरशीतिसंख्यकोमणिः (न्यायविभागे ३)

महामहोपाध्यायश्रीगङ्गेशोपाध्यायविरचितं

सिंहव्याघ्रलक्षणम्

श्रीरघुनाथशिरोमणिविरचितया

दीधित्या

श्रीजगदीशतर्कालङ्कारकृतया

जागदीश्या

न्यायाचार्य्य-तर्कतीर्थ-श्रीवामाचरणभट्टाचार्य्यकृतया

विवृत्या मनोरमया च सहितम्

मुद्रापणादिविधौ श्रीमतः 'श्रीकृष्णवल्लभाचार्य्य' स्वामिनारायणस्य 'न्यायाचार्य्य-सांख्ययोगवेदान्तमीमांसातीर्थस्य सहायतां प्राप्य' विवृत्तिकारैरेव संशोधितः

प्रथमं संस्करणम्

काशी-संस्कृत-बुकडिपोऽधिपतिभिः

मास्टर खेलाड़ीलाल ऐन्ड सन्स् महोदयैः

श्रीलक्ष्मीनारायणमुद्रणालये मुद्रापयित्वा प्रकाशितम्

१९९३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ॐ

विज्ञापनम्

अयि ! भोः सन्तः पण्डितवृन्दाः ! सम्प्रति वन्दनीयचरणानां गुरुवराणामनन्तविद्यार्थिहृदयसरोऽलङ्कुर्वतां रमणीयवचनारविन्दानामभिनवकौशलगन्धं मन्दं धारयता मम मानसमलयमरुता सततमेव न्यायकाठिन्यनिदाघजः सन्तापः समूलमुपहन्तुं शक्यत इति सम्भावयामि । तावदियं प्रकाशिता भवतामन्तिके सिंहव्याघ्रलक्षणजागदीश्या विवृतियेंदानीं सरलताजनतामासादयन्ती कर्कशतर्कदशनादपि सिंहव्याघ्रलक्षणात् भीतमुपसान्त्वयितुं सर्वथा समर्था प्रभवतीति मन्ये । अत्र च कश्चन प्राचीनप्रवादो गौडदेशेषु प्रचलितो वर्तते, यस्त्विदानीमपि लोकानां स्मृतिपथे पान्थायमानो विराजते । सोऽयं प्रवादस्तावदेवम्— "द्वावेव भ्रातरौ मिथिलानगरवास्तव्यौ मीमांसकप्रधानीभूतौ **'शशधरसिंह'–'मणिधरव्याघ्रौ'** पुरा पण्डितप्रवरौ बभूवतुः । वादिनां समीपे सिंहसदृशविक्रमशालितया शशधरस्य सिंहत्वम्, व्याघ्रसदृशविक्रमशालितया च मणिधरस्य व्याघ्रत्वम्, पुरा लोकप्रसिद्धमासीत् । तयोः शशधरसिंहकर्तृकं प्रथमलक्षणम् मणिधरव्याघ्रकर्तृकञ्च द्वितीयलक्षणमिति **सिंहव्याघ्रलक्षणतया** ग्रन्थनामेदानीमपि—विख्यातमस्माभिः श्रूयते । तदिदं लक्षणद्वयमपि स्वीयग्रन्थे नैयायिकप्रवरैर्गङ्गेशोपाध्यायैर्दूषितमिति सर्व एव जानन्ति । निरुक्तस्य प्रवादस्य समूलत्वममूलत्वं वा नेदानीं विचारणीयम् । वयन्तु पण्डितप्रवरात् श्रीमतः पञ्चाननतर्करत्नभट्टाचार्यमहोदयात् विदितोक्तवृत्तान्ताः संक्षेपेणैतावन्तं प्रकाशीकृत्य विरमाम इति ।

'वामाचरणभट्टाचार्यस्य'

(२६।६।३७)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समर्पणपत्रम्

परमपूजनीयानामशेषयशसां

धर्मशास्त्रप्रधानाध्यापकानां

स्मृतितीर्थोपाधिकानां

श्री 'शशिभूषणभट्टाचार्य्याणां'

मदीयपितृचरणानां

श्रीकरकमलेषु

सादरमिदं

समर्पितम्

वामाचरणभट्टाचार्य्येण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

सिंहव्याघ्रलक्षणरहस्यम्

चिन्तामणिः

नाऽपि साध्याऽसामानाधिकरण्याऽनधिकरणत्वम्,-

दीधितिः

नापीति। साध्यमसमानाधिकरणं यस्य, यदधिकरणा-

जागदीशी

श्रीगणाधीशाय नमः॥ साध्यासामानाधिकरण्यपदस्य साध्यव-

विवृतिः

लीलानतेन गुरुणा शशिशेखरेण
लज्जीकृतां श्रियमहं बहुशो भवान्याः।
वन्दे तुरीयफलदामथवाऽऽशु तस्याः
सङ्कोचितां चपलपादसरोजशोभाम् ॥१॥

लक्षणं वीक्षमाणानां सिंहव्याघ्रविलक्षणम्।
न्यायतो भीतचित्तानां प्रबोधाय पुनर्मया ॥२॥
क्रियते जगदीशस्य दुर्बोधवचसामियम्।
अस्त्रीभूतेव विवृतिर्वामाचरणशर्मणा ॥३॥

उत्तरवत् पूर्वपक्षस्यापि परिष्करणीयत्वादाह-मूले—नापीति। साध्यस्यासामानाधिकरण्यम्, साध्यासामानाधिकरण्यम्; तदनधिकरणत्वस्य प्रथमलक्षणार्थत्वे द्रव्यं सत्त्वादित्यत्राऽतिव्याप्तिः, द्रव्यत्वाधिकरणवृत्तित्वाभावरूपस्य द्रव्यत्वाऽसामानाधिकरण्यस्यानधिकरणतायाः सत्तायां सत्त्वात्, अतः षष्ठीतत्पुरुषं परित्यज्य-बहुव्रीहिसमासेन लक्षणार्थं व्याचष्टे दीधितौ—साध्यमिति। तथा च यदधिकरणनिरूपितवृत्तित्वाभाववत् साध्यं भवति तत्त्वं साध्यासामानाधिकरण्यम्, तदनधिकरणत्वं हेतौ व्याप्तिरिति प्रथमलक्षणार्थ इति भावः। वह्निमान् धूमादित्यादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

द्भिन्नवृत्तित्वार्थकत्वे साध्यवैयधिकरण्येत्यादिद्वितीयलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे—**साध्यमसमानाधिकरणं यस्येति**। तत्त्वमिति परेणान्वयः।

❀ विवृतिः ❀

घटाधिकरणवृत्तित्वाभावस्य वह्नौ सत्त्वात् यत्पदेन घटमादाय तन्निष्ठस्य तत्त्वस्यानधिकरणतायाः धूमे सत्त्वाल्लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तु नातिव्याप्तिः, वह्न्यधिकरणायःपिण्डवृत्तित्वाभावस्य धूमे सत्त्वेन यत्पदेन वह्नेर्धर्तुं शक्यतया तन्निष्ठस्य तत्त्वस्यानधिकरणत्वस्य वह्निरूपहेतावसत्त्वात्। ननु साध्यासामानाधिकरण्यघटकीभूतं साध्यपदं साध्यवत्परम्, नञश्च भेदवान् एवार्थस्तदेकदेशे भेदे च साध्यवतोऽन्वयमभ्युपगम्य साध्यवद्भेदाधिकरणवृत्तित्वरूपमेव साध्यासामानाधिकरण्यशब्दार्थमुक्त्वा तदनधिकरणत्वमेव प्रथमलक्षणार्थो निर्दोषतया लाघवेन च वक्तव्य इत्यत आह टीकायां—**साध्येति**। साध्यासामानाधिकरण्यशब्दस्येत्यर्थः। तेन साध्यासामानाधिकरण्यस्य वाक्यत्वेन पदत्वाभावेऽपि न क्षतिः। **साध्यवद्भिन्नेति**। पूर्वोक्तरीत्या साध्यवद्भिन्नवृत्तित्वार्थकत्वे इत्यर्थः। **पौनरुक्त्यापत्तिरिति**। तथा च साध्यवैयधिकरण्यानधिकरणत्वरूपद्वितीयलक्षणस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वार्थकतया प्रथमलक्षणस्यापि तादृशार्थकत्वे द्वयोस्तुल्यार्थकत्वेन पौनरुक्त्यापत्तिरतो लक्षणद्वयानुसरणं निष्प्रयोजनकमिति भावः। अतो = निरुक्तपौनरुक्त्यापत्तिरूपदोषतो, व्याचष्टे-साध्यासामानाधिकरण्यशब्दार्थमिति शेषः। अत्रेदं लक्षणं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्यद्व्यक्तित्वावच्छिन्नाधेयतानिरूपकाधिकरणनिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभाववत् साध्यं भवति तत्तद्व्यक्तित्वाधिकरणत्वाभावकूटवत्त्वमेव व्याप्तिरित्यर्थकमेवोपगन्तव्यम्। तेन न धूमवान् वह्नेरित्यादौ घटाद्यधिकरणवृत्तित्वाभावस्य धूमे सत्त्वेन यत्किञ्चिद्व्यक्तिपदेन घटादिकमादाय घटादिव्यक्तित्वानधिकरणत्वस्य वह्नौ वर्तमानत्वेऽप्यतिव्याप्तिर्न वा समवायेन धूमाधिकरणधूमावयववृत्तित्वाभावस्य वह्नौ वर्तमानतया धूमस्यापि यत्पदेनोपादानसम्भवात् तत्त्वानधिकरणत्वस्य धूमे विरहेऽपि वह्निमान् धूमादित्यादावव्याप्तिः। वृत्तित्वस्य साध्यतावच्छेदकसम्बन्धेन विवक्षणान्न धूमवान् वह्नेरित्यादौ धूमादेः कालिकेन वह्न्यधिकरणवृत्तित्वेऽप्यतिव्याप्तिः।

न च हेतुतावच्छेदकसम्बन्धेन यदधिकरणत्वविवक्षणे सत्तावान् जातेरित्यत्राव्याप्तिः, द्रव्यगुणकर्मणामेव हेतुतावच्छेदकसमवायसम्बन्धेन वर्त्तमानतया तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वन्हिमात्रस्यैव व्यधिकरणतत्तद्धूमासमानाधिकरणत्वात् वन्हिमान्धूमादित्यादावव्याप्तेराह—**यदधिकरणेति** । यदधिकरणमनधिकरणं यस्येति व्यु-

❀ विवृतिः ❀

तत्र सत्तायाः सत्त्वेन यद्यद्व्यक्तिपदेन कस्यापि धर्तुमशक्यत्वादितिवाच्यम् । यद्यद्व्यक्तिनिष्ठाधेयताया हेतुनिष्ठत्व-हेतुतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्वोभयाभाववत्त्वेन विवक्षितत्वात् । घटाभावत्वादिकमेव यद्यद्व्यक्तिपदेनोपादाय तस्य स्वरूपेणाधिकरणत्वस्य प्रसिद्धतया तत्राव्याप्तेरसम्भवात् ।

न च तथापि घटाभावत्वाद्यधिकरणे घटाभावे साध्यतावच्छेदकसमवायसम्बन्धेन वृत्तेरप्रसिद्ध्याऽव्याप्तितादवस्थ्यम्—इतिवाच्यम् । सम्बन्धसामान्यावच्छिन्नायाः यद्यद्व्यक्त्यधिकरणवृत्तितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नवृत्तिताप्रतियोगिकस्वरूपसम्बन्धेनाभावस्य विवक्षितत्वादिति ध्येयम् ।

साध्यासामानाधिकरण्यशब्दस्यार्थान्तरत्वप्रदर्शने हेतुमाह—**वह्निमात्रस्येति** महानसीयवह्न्यादेः सर्वस्यैवेत्यर्थः । **व्यधिकरणेति** । महानसीयवह्न्यादेर्व्यधिकरणस्तदधिकरणेऽवर्तमानो यो पर्वतीयधूमादिस्तदधिकरणाऽवृत्तित्वादित्यर्थः । **अव्याप्तेरिति** । तथा च महानसीयवह्निरूपे साध्ये पर्वतीयधूमाधिकरणपर्वतवृत्तित्वाभावस्य पर्वतीयवह्नौ च महानसीयधूमाधिकरणमहानसवृत्तित्वाभावस्य सत्त्वेन यद्यद्व्यक्तिपदेन सर्वस्या एव धूमव्यक्तेर्ग्रहीतुं शक्यतया तत्तद्व्यक्तित्वानधिकरणत्वस्य कुत्रापि धूमेऽसत्त्वान् निरुक्तरीत्या लक्षणार्थनिर्वचने वह्निमान् धूमादित्यादावव्याप्तिरिति भावः ।

न च यदधिकरणनिरूपितवृत्तितानवच्छेदकं साध्यतावच्छेदकं तत्त्वानधिकरणत्वविवक्षणान्न वह्निमान् धूमादित्यादावव्याप्तिः । कस्यापि धूमव्यक्तेरधिकरणवृत्तितानवच्छेदकत्वस्य वह्नित्वे विरहेण धूमादेर्यत्पदेनोपादानाऽसम्भवादितिवाच्यम् । महानसीयवह्निमान् धूमादित्यत्रातिव्याप्त्यापत्तेः, विशेष्यवृत्तिपदार्थस्य विशिष्टाधिकरणकाभावस्यानभ्युपगमेन वह्नित्वनिष्ठस्य धूमाधिकरणवृत्तितावच्छेदकत्वस्याभावस्य महानसीयवह्नित्वादाववर्तमानतया यत्पदेन धूमस्य धर्तुमशक्यत्वादिति **वदन्ति** ।

न च तथापि साध्यतावच्छेदकव्यापकीभूतो यदधिकरणवृत्तित्वाभावस्तत्त्वानधिकरणत्वविवक्षणान्न कोऽपि दोषः, वह्नित्वव्यापकतायाः कस्यापि धूमादेरधि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

त्पत्त्या यस्याधिकरणं साध्यानधिकरणं तत्त्वमित्यर्थः। तत्तद्धूमाधिकरणं तु न वन्हिसामान्यानधिकरणमतो नाव्याप्तिरिति भावः। ननु

❀ विवृतिः ❀

करणवृत्तित्वाभावेऽसत्त्वेन यत्पदेन धूमादेरुपादातुमशक्यत्वादिति वाच्यम्। तथा सति गौरवात्। न च द्रव्यं सत्त्वादित्यत्रातिव्याप्तिः, सत्ताधिकरणवृत्तित्वसामान्याभावस्य द्रव्यत्वे विरहादिति वाच्यम्। यदधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वसामान्याभावस्य विवक्षितत्वादितिदिक्।

यस्याधिकरणं = यद्व्यक्तित्वावच्छिन्नाधिकरणम्। साध्यानधिकरणम् = साध्यतावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभिन्नम्। तत्त्वम् = तद्व्यक्तित्वम्। साध्यासामानाधिकरण्यमितिशेषः। तत्तद्धूमाधिकरणम्=पर्वतादिकम्। न वह्निसामान्यानधिकरणम्=न वह्नित्वावच्छिन्ननिरूपकताकाधिकरणत्वावच्छिन्नभिन्नम्। नाव्याप्तिरिति। यद्व्यक्तिपदेन तत्तद्धूमादेर्धर्तुमशक्यत्वादिति भावः। निरुक्तसाध्यासामानाधिकरण्यघटितमपि लक्षणं यद्व्यक्तित्वावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपकाधिकरणं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभिन्नं तद्व्यक्तित्वानधिकरणत्वं हेतौ व्याप्तिरित्यर्थकमेव वाच्यम्। तेन समवायेन धूमाधिकरणे धूमावयवे संयोगेन वह्निसामान्याधिकरणभेदस्य संयोगेन वा धूमाधिकरणपर्वतादौ समवायेन वह्निसामान्याधिकरणवह्न्यवयवभेदस्य, संयोगेन तत्तद्वह्न्यधिकरणभेदस्य वह्निसामान्याधिकरणीभूतयत्किञ्चिदधिकरणभेदस्य च वर्त्तमानत्वेऽपि न वह्निमान् धूमादित्यादावव्याप्तिः, न वा केवलसत्ताधिकरणभेदस्य जात्यधिकरणे विरहात् यद्व्यक्तिपदेन जातिव्यक्तेरुपादानाऽसम्भवेऽपि विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिः, विशिष्टसत्तात्वावच्छिन्नाधिकरणद्रव्यभेदस्य जात्यधिकरणे गुणादौ सत्त्वात्। यद्व्यक्तित्वावच्छिन्नाधेयतायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वं च हेतुतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्वहेतुनिष्ठत्वोभयाभाववत्त्वम्, तेन न पूर्ववत् सत्तावान् जातेरित्यत्राव्याप्तिः, तत्र ध्वंसत्वादिव्यक्तिमादायैव लक्षणसमन्वयसम्भवादिति ध्येयम्। तथा च वह्निमान् धूमादित्यादौ घटव्यक्तित्वाद्यवच्छिन्नस्य संयोगेनाधिकरणे भूतलादौ संयोगेन वह्नित्वावच्छिन्नस्याधिकरणभेदस्य वर्त्तमानतया तादृशघटव्यक्तित्वानधिकरणतायाः धूमे सत्त्वाल्लक्षणसमन्वय इति तु परमार्थः। अन्यत् सर्वं स्वयमूहनीयम्॥

साध्यनिष्ठेत्यादिदीधितिग्रन्थोत्थितौ बीजं प्रदर्शयितुं शङ्कते—नन्विति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

नधिकरणं साध्यं तत्त्वम्। साध्यनिष्ठासामानाधिकरण्यप्रति-

❀ जागदीशी ❀

घटादिस्वरूपयद्व्यक्त्यधिकरणं साध्यीभूतधूमाद्यनधिकरणं तद्व्यक्तित्वानधिकरणत्वं वह्न्यादेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः। यद्यद्व्यक्त्यधिकरणं साध्याऽनधिकरणं तत्तद्व्यक्तित्वानधिकरणत्वोक्तौ तु महागौरवमत आह—साध्यनिष्ठेति। साध्यनिष्ठाभावप्रतियोगित्वं सद्धेतोरप्यस्तीत्यतः

❀ विवृतिः ❀

उक्तरीत्या लक्षणार्थनिर्वचनेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तिः, घटव्यक्तित्वावच्छिन्नाधिकरणभूतलादेर्धूमत्वावच्छिन्नाधिकरणभिन्नतया तादृशघटव्यक्तित्वानधिकरणत्वस्य वह्न्यादौ सत्त्वादित्याह—घटादीति। आदिना पटादिपरिग्रहः। घटादिस्वरूपा या यद्व्यक्तिस्तस्या अधिकरणं भूतलादीत्यर्थः। तद्व्यक्तित्वानधिकरणत्वम् = घटव्यक्तित्वानधिकरणत्वम्।

ननु यद्यद्व्यक्तित्वावच्छिन्नाधिकरणं साध्यतावच्छेदकावच्छिन्नाधिकरणभिन्नं तत्तद्व्यक्तित्वानधिकरणत्वस्य व्याप्तिपदार्थतया न धूमवान् वह्नेरित्यत्रातिव्याप्तिः। यद्यद्व्यक्त्यन्तर्गतवह्निव्यक्तित्वावच्छिन्नाधिकरणस्यायोगोलकस्य धूमाधिकरणभिन्नतया तादृशवह्निव्यक्तित्वानधिकरणत्वस्य वह्नौ विरहादत आह— यद्यत्-इति। तत्तदिति। तत्तद्व्यक्तित्वानधिकरणत्वस्य व्याप्तिपदार्थत्वोक्तावित्यर्थः। महागौरवमिति। स्वाधिकरणसाध्यानधिकरणिका यावत्यो व्यक्तयः प्रत्येकं तत्तद्व्यक्तित्वाधिकरणभेदकूटस्य हेतौ विवक्षणीयतया महागौरवमिति भावः। इदमुपलक्षणम्—तादृशभेदकूटस्यासर्वज्ञदुर्ज्ञेयत्वमपि निरुक्तविवक्षायां दोष इत्यपि बोध्यम्।

दीधितौ—साध्यनिष्ठेति। साध्यनिष्ठो यः सामानाधिकरण्याभावः। तत्प्रतियोगित्वं साध्यासामानाधिकरण्यं तदनधिकरणत्वं लक्षणार्थ इति भावः।

ननु साध्यनिष्ठाभावप्रतियोगित्वानधिकरणत्वमेव विवक्ष्यतां किं सामानाधिकरण्याभावविवक्षणेनेत्यत आह—साध्यनिष्ठेति। सद्धेतावपि = वह्न्यादिसाध्यकधूमादिहेतावपि। तथा च साध्यनिष्ठाभावप्रतियोगित्वानधिकरणत्वस्य व्याप्तित्वे वह्निमान् धूमादित्यादावव्याप्तिः वह्निनिष्ठस्य धूमाभावस्य यत् प्रतियोगित्वं धूमनिष्ठं तदनधिकरणत्वस्य धूमे विरहात्। न त्वसम्भवः, तादात्म्येन घटादिसाध्यकैतत्त्वादिहेतौ घटादिरूपे साध्ये एतत्त्वाद्यभावस्याऽसत्त्वेन लक्षणसमन्वयसम्भवादिति भावः। उक्त इति। तथा च साध्यनिष्ठसामाना-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

सामानाधिकरण्याभाव उक्तः । न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य

❀ विवृतिः ❀

धिकरण्याभावप्रतियोगित्वानधिकरणत्वस्य व्याप्तित्वे तु न वह्निमान् धूमादित्यादावव्याप्तिः । वह्निनिष्ठघटसामानाधिकरण्याभावप्रतियोगित्वस्य सामानाधिकरण्यनिष्ठस्याऽनधिकरणतायाः धूमादौ सत्त्वादित्याशयः ।

ननु साध्ये वर्त्तमानो यः सामानाधिकरण्याभावस्तत्प्रतियोगित्वानधिकरणत्वं यदि लक्षणार्थस्तदा धूमवान् वह्नेरित्यादावतिव्याप्तिः, धूमनिष्ठस्य वह्निसामानाधिकरण्याभावस्य प्रतियोगितायास्तादृशसामानाधिकरण्यमात्रे वर्त्तमानतया तदनधिकरणत्वस्य वह्नौ सत्त्वादित्याशङ्कते—**न चेति** । अतिव्याप्तिरिति

❀ मनोरमा ❀

गुरूणां चरणे नत्वा स्मृत्वा तद्वचनं मया ।
क्रियते विदुषामर्थे सिंहव्याघ्रमनोरमा ॥ १ ॥

साध्यनिष्ठस्येति । नन्वत्र कल्पे रूपादिभिन्नं रूपत्वादिसामानाधिकरण्यादित्यत्र रूपादिभेदनिष्ठस्य रूपत्वादिसामानाधिकरण्याभावस्य प्रतियोगितायाः हेतौ सत्त्वादव्याप्तिसम्भवेऽतिव्याप्तिदानमसङ्गतम् । न च सामानाधिकरण्यत्वमात्रावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वानधिकरणत्वरूपमर्थमभिप्रेत्यैव अतिव्याप्त्यभिधानमिति वाच्यम् । तादृशाभावस्यावृत्तिमात्रनिष्ठतया साध्यनिष्ठत्वाऽसम्भवेनासम्भवापातात् । **एतेन** साध्यनिष्ठासामानाधिकरण्यनिरूपितं यद्धेतुतावच्छेदकानवच्छिन्नप्रतियोगित्वं तदनधिकरणत्वमित्यपि न, साध्यनिष्ठाभावीयतथाविधप्रतियोगित्वानधिकरणत्वनिवेशेनैवातिव्याप्तिसम्भवेऽसामानाधिकरण्यपर्य्यन्तानुसरणस्य निर्वीजत्वापत्तेरिति चेदत्र ब्रूमः । साध्यनिष्ठासामानाधिकरण्यपदेन किञ्चिदवच्छेदेन साध्यनिष्ठहेतुसामानाधिकरण्याभावस्यैवाभिप्रेततयाऽव्याप्त्यसम्भवेनातिव्याप्तेरभिहितत्वान्न कोऽपि दोषः । न च सामानाधिकरण्यदलं व्यर्थम्, साध्यनिष्ठहेत्वभावमादायासम्भववारकतयैव तत्सार्थक्यसम्भवादिति **ध्येयम्** । **केचित्तु**-साध्यनिष्ठो यःसामानाधिकरण्यसामान्याभावस्तत्त्वं तादृशसामानाधिकरण्यप्रतियोगित्वं तदनधिकरणत्वमित्युक्तौ न तत्राऽव्याप्तिः यथोक्तसामानाधिकरण्याभावप्रतियोगित्वस्य रूपत्वादिसामानाधिकरण्यरूपहेतावसत्त्वात् । न चातिव्याप्त्यभिधानमसङ्गतमिति वाच्यम् । वह्निसामानाधिकरण्यसामान्याभावस्य धूमे विरहेण यत्पदेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

प्रतियोगित्वं सामानाधिकरण्य एववर्तते न तु वन्ह्यादावित्यसद्धेतावतिव्याप्तिः। साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणवृत्तित्वस्य विवक्षितत्वात्।

❀ विवृतिः ❀

परेणान्वयः । साध्यनिष्ठस्य = धूमादिनिष्ठस्य । सामानाधिकरण्याभावस्य = वह्न्यादिसामानाधिकरण्याभावस्य । **अतिव्याप्तिरिति** । तथा च व्यभिचारिमात्रे निरुक्तरीत्याऽतिव्याप्तिरिति हृदयम् । समाधत्ते—**साध्यनिष्ठेति** । साध्यनिष्ठः = साध्ये वर्त्तमानो योऽभावस्तत्प्रतियोगिनी या वृत्तिता तन्निरूपकाधिकरणनिरूपितवृत्तित्वस्येत्यर्थः । **विवक्षितत्वात्** । साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वपदेनेत्यादिः । तथा च साध्यनिष्ठाभावनिरूपितप्रतियोगिताश्रयीभूतवृत्तितानिरूपकं यदधिकरणं तन्निरूपितवृत्तित्वानधिकरणत्वस्यैव व्याप्तिपदार्थतया न धूमवान् वह्नेरित्यत्रातिव्याप्तिः । धूमे वर्त्तमानस्यायोगोलकवृत्तित्वाभावस्य प्रतियोगिभूताया अयोगोलकवृत्तितायाः निरूपकाधिकरणायोगोलकवृत्तित्वस्य वह्नौ सत्त्वेन तदनधिकरणत्वस्य तत्राऽसत्त्वात् । न वा वह्निमान् धूमादित्यादावव्याप्तिः, वह्नौ वर्त्तमानस्य भूतलादिवृत्तित्वाभावस्य प्रतियोगिभूतायाः भूतलादिवृत्तितायाः निरूपकाधिकरणभूतलादिवृत्तित्वस्यानधिकरणतायाः धूमे सत्त्वादिति भावः ।

❀ मनोरमा ❀

वह्निरूपादातुमशक्यतयैवातिव्याप्तिसम्भवादित्याहुः । **साध्यनिष्ठाभावेति** । ननु साध्यनिष्ठाभावप्रतियोगिवृत्तित्वानधिकरणत्वस्यैव व्याप्तित्वसम्भवे तादृशवृत्तितानिरूपकाधिकरणवृत्तित्वानधिकरणत्वस्य तथात्वाभिधानं वृत्तिताद्वयप्रवेशेन गौरवमितिचेन्न । तादृशवृत्तित्वं यदि हेतुतावच्छेदकसम्बन्धावच्छिन्नम्, तदा वह्निमान् पर्वतीयरूपादित्यत्राव्याप्तिः, तत्पर्वतनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावस्य साध्यनिष्ठतया तत्प्रतियोगिवृत्तित्वानधिकरणत्वस्य हेतावसत्त्वात् । यदि च साध्यतावच्छेदकसम्बन्धावच्छिन्नम्, तदा वह्निमान् वह्निरूपादित्यत्रातिव्याप्तिः, साध्यनिष्ठस्य संयोगावच्छिन्नह्रदादिवृत्तित्वाभावस्य प्रतियोगितादृशवृत्तित्वानधिकरणत्वस्य वह्निरूपेऽक्षतत्वात् । नाप्यन्यतरसम्बन्धावच्छिन्नम्, अन्यतरत्वस्याखण्डस्याभावेन गौरवापत्तेः । अस्माकं तु प्रथमं वृत्तित्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं द्वितीयं तु हेतुतावच्छेदकसम्बन्धावच्छिन्नमिति न कोऽपि दोष इत्यस्मद्गुरुचरणाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

(वस्तुतः असामानाधिकरण्यं सामानाधिकरण्यसम्बन्धेनाऽभाव इति तु परमार्थः । न न्वेवमपि द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः ।

❀ विवृतिः ❀

न चोक्तविवक्षायामपि वह्निमान् धूमादित्यत्राव्याप्तिर्वह्निनिष्ठस्य समवायावच्छिन्नपर्वतवृत्तित्वाभावस्य प्रतियोगिभूतं यत् समवायावच्छिन्नं वृत्तित्वं तन्निरूपकाधिकरणीभूतपर्वतवृत्तित्वानधिकरणत्वस्य धूमे विरहादिति वाच्यम्। यत्सम्बन्धावच्छिन्नं साध्यनिष्ठाभावप्रतियोगिभूतं यद्वृत्तित्वं तन्निरूपकाधिकरणनिरूपिततत्सम्बन्धावच्छिन्नवृत्तित्वानधिकरणत्वस्य विवक्षितत्वात् । समवायावच्छिन्नतादृशवृत्तितानिरूपकपर्वतनिरूपितसमवायावच्छिन्नवृत्तित्वानधिकरणत्वस्य धूमे सत्त्वेनाव्याप्तेरसम्भवात् । वस्तुतो प्रथमवृत्तित्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं द्वितीयं च हेतुतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम् , तेन न वह्निमान् पर्वतीयरूपादित्यत्राऽव्याप्तिरित्यन्यत्र विस्तरः । न च तथापि घटत्वसंयोगावच्छिन्नपर्वतवृत्तित्वोभयाभावस्य वह्निनिष्ठतया तदीयप्रतियोगिताश्रयीभूततादृशपर्वतवृत्तित्वमादाय वह्निमान् धूमादित्यत्राव्याप्तितादवस्थ्यमिति वाच्यम् । स्वप्रतियोग्यधिकरणावृत्तित्वेन साध्यनिष्ठाभावस्य विवक्षणीयत्वादितिध्येयम् ।

यत्तु–साध्यनिष्ठाभावप्रतियोगिवृत्तित्वस्य हेतुतावच्छेदकसम्बन्धेन विवक्षणान्न वह्निमान् धूमादित्यत्राव्याप्तिः । न चैवं सत्तावान् जातेरित्यत्राव्याप्तिः–घटादिसमवेतत्वाभावस्य सत्तारूपसाध्यनिष्ठत्वाऽसम्भवात् सामान्यादिसमवेतत्वस्य चाप्रसिद्धत्वादिति वाच्यम् । स्वरूपसम्बन्धानवच्छिन्नत्वहेतुतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्वोभयाभाववद्वृत्तिताया एव स्वसाध्यनिष्ठाभावप्रतियोगिवृत्तितापदेन विवक्षितत्वात् जात्यादिनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभावमादायैव लक्षणसमन्वयसम्भवादिति मतम् , **तत्तुच्छम्** । स्वरूपसम्बन्धावच्छिन्नपर्वतवृत्तित्वाभावस्य वह्निनिष्ठतया तादृशाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिप्रसङ्गादित्यवधेयम् ॥

केचित्तु—वृत्तित्वस्य विवक्षितत्वादित्यनन्तरं वस्तुतोऽसामानाधिकरण्यं सामानाधिकरण्यसम्बन्धावच्छिन्नाभाव इत्यादिपाठं कल्पयन्तो धूमवान् वह्नेरित्यादावतिव्याप्तिंवारयन्ति । तन्न समीचीनम् , सामानाधिकरण्यस्य वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगित्वाऽप्रसिद्धेः, तस्य व्याप्यवृत्तित्वेन द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेश्च । **नन्वेवमपीति** । साध्यासामानाधिकरण्यपदेन निरुक्तवृत्तितायाः विवक्षितत्वेऽपीत्यर्थः । **इत्यादीति** । धूमादिरूपे वह्निरूपसाध्याऽ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

सामानाधिकरण्याभावस्याव्याप्यवृत्तित्वेन साध्यनिष्ठत्वात्, एतदस्वरसेनैव वा कल्पान्तरानुसरणादित्यपरे)। नन्वेवमपि वन्हिमान्धूमादित्यादिविषमव्याप्ते हेतावव्याप्तिः। वन्हिनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य प्रतियोगिभूतं यदाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात्, साध्यसामान्यनिष्ठाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्ति-

❀ विवृतिः ❀

व्यापकीभूते हेतावित्यर्थः। आदिपदात् रूपवान् रसादित्यादिविषमव्याप्तहेतुपरिग्रहः। **इदं तु उपलक्षणम्**—आर्द्रेन्धनप्रभववह्निमान् धूमादित्यादिसमव्याप्तहेतावपि वक्ष्यमाणरीत्याऽव्याप्तिः सम्भवतीत्यपि द्रष्टव्यम्।

प्राञ्चस्तु—शब्दवान् गगनत्वात् सत्तावान् जातेरित्यादिसमव्याप्तहेतौ लक्षणसमन्वयसम्भवेन समव्याप्तहेतुमात्रेऽव्याप्तेरसम्भवात् विषमव्याप्तहेतावव्याप्त्यभिधानमिति **वदन्ति**। तच्चिन्त्यम्। द्रव्यं घटत्वादित्यादिविषमव्याप्तहेतौ लक्षणसमन्वयसम्भवेन विषमव्याप्तहेतुमात्रेऽपि अव्याप्तेरभावात्। **वस्तुतोऽने**काधिकरणकानेकसाध्यकतथाविधहेतुत्वमेवात्र विषमव्याप्तहेतुत्वम्, तच्चार्द्रेन्धनप्रभववह्निसाध्यकधूमहेतुसाधारणम्। तथा च तत्राव्याप्तिसम्भवेऽपि न क्षतिरिति मन्तव्यम्॥ निरुक्तामव्याप्तिमुपपादयति-**वह्निनिष्ठस्येति**। साध्यीभूतमहानसीयवह्न्यादिनिष्ठस्येत्यर्थः॥ **पर्वतवृत्तित्वाद्यभावस्येति**। आदिना-महानसादिवृत्तित्वाभावपरिग्रहः। पर्वतादावित्यत्र चादिना महानसादिपरिग्रहः। **वर्त्तमानत्वादिति**। तथा च निरुक्तविवक्षायामपि वह्निमान् धूमादित्यादावव्याप्तिः, साध्यीभूतमहानसीयवह्नौ पर्वतादिवृत्तित्वाभावस्य तादृशपर्वतीयवह्नौ च महानसादिवृत्तित्वाभावस्य चालनीयन्यायेन वर्तमानतया तदीयप्रतियोगिताश्रयीभूतायाः पर्वतादिवृत्तितायाः निरूपकाधिकरणीभूतपर्वतादिवृत्तित्वस्य धूमादिनिष्ठस्यानधिकरणताया धूमादौ विरहादिति भावः॥

ननु साध्यतावच्छेदकव्यापकीभूतो योऽभावस्तत्प्रतियोगिवृत्तितानिरूपकाधिकरणवृत्तित्वानधिकरणत्वस्य व्याप्तित्वे न वह्निमान् धूमादित्यादावव्याप्तिः, महानसीयवह्न्यादिनिष्ठस्य पर्वतवृत्तित्वाद्यभावस्य साध्यतावच्छेदकीभूतवह्नित्ववति पर्वतीयवन्ह्यादावसत्त्वेन तस्य साध्यतावच्छेदकाव्यापकत्वादत आह—**साध्येति**। साध्यतावच्छेदकव्यापकाभावप्रतियोग्याधेयतानिरूपकाधिकरणवृत्तित्वे साध्यासामानाधिकरण्यपदेन विवक्षिते इत्यर्थः। तेन सामान्यपदस्य व्यापकत्वातिरिक्तार्थ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

योगित्वम् , साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति

❀ जागदीशी ❀

त्वोक्तौ च महागौरवमत आह—साध्यनिष्ठाधेयत्वेति । अत्राधेयत्वं साध्य-

❀ विवृतिः ❀

कत्वस्य दुर्वचत्वेऽपि न क्षतिः । **महागौरवमिति ।** व्यापकतार्थकसाध्यसामान्यपदघटितत्वेनेत्यादिः ॥

दीधितौ—**साध्यनिष्ठेति ।** साध्यतावच्छेदकावच्छिन्नाधेयत्वाऽनिरूपकं यदधिकरणं तन्निरूपितवृत्तित्वं साध्यासामानाधिकरण्यम् । तदनधिकरणत्वं व्याप्तिरित्यर्थः । तेन साध्यीभूतमहानसीयवह्न्यादिनिष्ठाधेयत्वाऽनिरूपकाधिकरणपर्वतादिवृत्तित्वस्य धूमे सत्त्वेऽपि न वह्निमान् धूमादित्यादावव्याप्तिः, वह्नित्वावच्छिन्नाधेयत्वाऽनिरूपकाधिकरणजलादिवृत्तित्वस्य मीनादिनिष्ठस्यानधिकरणतायाः धूमे सत्त्वात्; न वा विषयितया महानसीयवह्निसाध्यकतज्ज्ञानत्वहेतौ केवलवह्निनिष्ठाधेयत्वाऽनिरूपकतज्ज्ञाननिरूपितवृत्तित्वस्य तज्ज्ञानत्वनिष्ठस्यानधिकरणतायास्तज्ज्ञानत्वे विरहेऽप्यव्याप्तिः । धूमवान् वह्नेरित्यादौ च धूमत्वावच्छिन्नाधेयत्वाऽनिरूपकाधिकरणीभूतायोगोलकवृत्तित्वस्य वह्नौ सत्त्वान्नातिव्याप्तिरित्यवधेयम् । साध्यतावच्छेदकवैशिष्ट्यं तु साध्यतावच्छेदकताघटकसम्बन्धेन बोध्यम् । तेन विषयितया रूपत्वादिविशिष्टज्ञाननिष्ठसमवायावच्छिन्नाधेयत्वाऽनिरूपकाधि-

❀ मनोरमा ❀

महागौरवमिति । न च—साध्यसामान्यनिष्ठाभावविवक्षणे संयोगेन द्रव्यसाध्यकधूमहेतावव्याप्तिः प्रथमाधेयतायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन विवक्षणीयतया द्रव्यसामान्ये संयोगावच्छिन्नवृत्तित्वाभावाऽप्रसिद्धेः गुणादौ संयोगेन वृत्तेरप्रसिद्ध्या तद्वृत्तित्वाभावस्य वक्तुमशक्यत्वादिति गौरवाभिधानमसङ्गतमिति-वाच्यम् । साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयताप्रतियोगिकस्वरूपसम्बन्धेन यदधिकरणवृत्तित्वाभावः साध्यसामान्यनिष्ठः हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वप्रतियोगिकस्वरूपसम्बन्धेन तदधिकरणवृत्तित्वाभावस्य विवक्षितत्वात्, अत एव सत्तावान् धूमादित्यत्र नाव्याप्तिः स्वरूपसम्बन्धावच्छिन्नजात्यादिवृत्तित्वाभावमादायैव लक्षणसमन्वयसम्भवात् तथा च द्रव्यवान् धूमादित्यत्र समवायावच्छिन्नगुणादिवृत्तित्वाभावमादायैव लक्षणसमन्वयसम्भवात् गौरवाभिधानमिति तु विभावनीयम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

ताघटकसम्बन्धेन ग्राह्यम्। तेन रूपवान्महाकालत्वादित्यादौ सम्बन्धसामान्येन

❀ विवृतिः ❀

करणघटवृत्तित्वानधिकरणत्वस्य पृथिवीत्वे विरहेऽपि न रूपवान् पृथिवीत्वादित्यत्राव्याप्तिः। न वा कालिकसम्बन्धेन धूमत्वविशिष्टस्य वह्न्यादेराधेयत्वानिरूपकजलादिवृत्तित्वानधिकरणत्वस्य वह्नौ सत्त्वेऽपि धूमवान् वह्नेरित्यत्राव्याप्तिः।

ननु साध्यतावच्छेदकावच्छिन्नाधेयत्वं यदि यत्किंचित्सम्बन्धावच्छिन्नं तदा वह्निमान् धूमादित्यादावव्याप्तिः समवायावच्छिन्नवह्निनिष्ठाधेयत्वाऽनिरूपकपर्वतादिवृत्तित्वस्य धूमे सत्त्वात्। यदि च संयोगसम्बन्धावच्छिन्नं तदा रूपवान् पृथिवीत्वादित्यादावव्याप्तिः। संयोगसम्बन्धावच्छिन्नायाः रूपनिष्ठाधेयताया अप्रसिद्धेः। समवायेन घटसाध्यककपालत्वहेतावव्याप्तिश्च, घटनिष्ठसंयोगसम्बन्धावच्छिन्नाधेयत्वाऽनिरूपकाधिकरणकपालवृत्तित्वस्य कपालत्वे सत्त्वात्। संयोगसमवायकालिकाद्यन्यतमसम्बन्धावच्छिन्नं चेत्! तदा समवायेन रूपसाध्यकमहाकालत्वहेतावतिव्याप्तिः। तादृशसम्बन्धसामान्यावच्छिन्नरूपनिष्ठाधेयत्वाऽनिरूपकाधिकरणीभूतगगनादिवृत्तित्वानधिकरणत्वस्य महाकालत्वे सत्त्वादित्याहाऽऽधेयत्वमिति। साध्यतावच्छेदकधर्मावच्छिन्नाधेयत्वमित्यर्थः। **तेनेति**। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेन निरुक्ताधेयतायाः विवक्षणेनेत्यर्थः। **महा-**

❀ मनोरमा ❀

रूपवान् महाकालत्वादिति। स्वरूपसम्बन्धेन हेतुतालाभाय कालत्वमपेक्ष्य महाकालत्वस्य हेतुतानुसरणम्, अन्यथा कालिकेन महाकालत्वस्य हेतुत्वे सम्बन्धसामान्येन रूपनिष्ठाधेयत्वाऽनिरूपके गगनादौ कालिकसम्बन्धावच्छिन्नवृत्तित्वाऽप्रसिद्ध्यैवातिव्याप्तिवारणं स्यादिति ध्येयम्। **यत्तु** साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयताया अप्रवेशे यादृशहेतुकव्यभिचारिमात्रेऽतिव्याप्तिस्तादृशहेतुर्महाकालत्वमेव न तु कालत्वं, जन्यरूपवान् कालत्वादित्यादौ सम्बन्धसामान्येन जन्यरूपनिष्ठाधेयत्वाऽनिरूपके महाप्रलये कालत्वस्य सत्त्वेनातिव्याप्त्यसम्भवादित्युक्तं कालीशङ्करैः, तन्न, जन्यरूपवान् तत्क्रियाव्यक्तित्वादित्यत्र जन्यरूपनिष्ठसम्बन्धसामान्यावच्छिन्नाधेयत्वाऽनिरूपके प्रलयादौ तत्क्रियाव्यक्तित्वस्यासत्त्वेनातिव्याप्तिसम्भवे महाकालत्वहेतावतिव्याप्त्यभिधानस्य निर्बीजत्वापत्तेः।

सम्बन्धसामान्येन साध्यनिष्ठाधेयतायाः विवक्षणे कालिकेन वाच्यत्वसाध्यकजन्यत्वहेतौ, स्वरूपेण महाकालभेदसाध्यकघटत्वादिहेतौ स्वरूपकालिकादिसम्बन्ध-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ विवृतिः ❀

कालत्वादित्यादाविति। केचित्त्वत्र कालत्वमात्रस्य हेतुत्वे रूपासमानकालीनस्य स्पन्दादेः सम्बन्धसामान्येनैव रूपनिष्ठाधेयत्वानिरूपकाधिकरणतया तद्वृत्तित्वस्य तत्र सत्त्वादतिव्याप्तेरभावात् महाकालत्वस्य हेतुत्वानुसरणम्। आदिपदात्—रूपसमानकालीनघटव्यक्तिमहाकालान्यतरत्वहेतोः परिग्रहः।

एतेन—वह्निमान् गगनादित्यत्रातिव्याप्तिवारणाय साध्यसामानाधिकरण्यस्यावश्यं विवक्षणीयतया तत एव रूपसाध्यकमहाकालत्वहेतावतिव्याप्तिवारणसम्भवे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाधेयताया विवक्षणमनुचितमिति **पूर्वपक्षो निरस्तः,** निरुक्तान्यतरत्वे रूपसामानाधिकरण्यस्य सत्त्वादिति **वदन्ति।**

आधेयतायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं च साध्यतावच्छेदकसंसर्गतावच्छेदकतापर्य्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकत्वम् तेन संयोगेन धूमहेतौ महानसीयसंयोगावच्छिन्नवह्निनिष्ठाधेयत्वं, समवायसंयोगान्यतरसम्बन्धेन वह्निसाध्यकधूमहेतौ च केवलसमवायावच्छिन्नाधेयत्वमादाय तदनिरूपकाधिकरण-

❀ मनोरमा ❀

सामान्यावच्छिन्नाधेयत्वानिरूपकाधिकरणाऽप्रसिद्धयाऽव्याप्तिसम्भवेऽतिव्याप्त्यभिधानमनुचितमिति तु नाशङ्कनीयम्। स्वरूपातिरिक्तसम्बन्धसामान्यावच्छिन्नसाध्यनिष्ठाधेयताया एव सम्बन्धसामान्यावच्छिन्नसाध्यनिष्ठाधेयतापदेन विवक्षणीयतया कालिकसम्बन्धावच्छिन्नतादृशसाध्यनिष्ठाधेयतामादायैवोक्तस्थलद्वयेऽव्याप्तिवारणसम्भवात्। ये तु कालीशङ्कराः सम्बन्धसामान्यपदस्य यत्किञ्चित्सम्बन्धपरत्वामभिप्रेत्याव्याप्तिं वारयन्ति, तेषां सम्बन्धसामान्येनेत्याद्यपव्याख्यानं स्यादिति तन्मतमुपेक्षितमस्माभिः। साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वव्यापकमित्यत्र तादृशाधेयत्वाऽनिरूपकाधिकरणत्वं स्वनिरूपकाधिकरणत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकत्वंताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाधेयताविशिष्टत्वम्, तेन साध्यनिष्ठाधेयत्वाऽनिरूपकत्वविशिष्टाधिकरणतायाः हेत्वधिकरणतारूपत्वेऽपि नासम्भव इति ध्येयम्। हेत्वभावत्वे साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतावच्छेदकत्वं तादृशाधिकरणतावन्निष्ठाभावप्रतियोगितानवच्छेदकत्वरूपम्। तत्र तादृशाधिकरणतावन्निष्ठत्वमभावे स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नग्रहप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धेन बोध्यम्। स्वपदं तादृशाधिकरणतावन्निष्ठत्वेनाभिमताभावव्यक्तिपरम्, तेन न वह्निमान् धूमादित्यादौ वह्निनिष्ठाधेयत्वाऽनिरूपके धूमावयवादौ समवायादिना संयोगावच्छिन्नधूमाभावस्याभावस्य धूमस्य वर्त्तमानत्वेऽप्यव्याप्तिरिति संक्षेपः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

यावत्। तदनधिकरणत्वमित्यर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः।—

❀ जागदीशी ❀

रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोरवृत्तित्वेऽपि नातिव्याप्तिः। तद्वृत्तौ- साध्यवद्भिन्नवृत्तौ। ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमवश्यं

❀ विवृतिः ❀

पर्वतवृत्तित्वस्य धूमे सत्त्वेऽपि नाव्याप्तिः। हेतोः = महाकालत्वस्य। अवृत्तित्वेऽपि = वृत्तित्वानधिकरणत्वेऽपि। **नातिव्याप्तिरिति**। न च सम्बन्धसामान्येन साध्यनिष्ठाधेयतायाः विवक्षणे सम्बन्धसामान्येन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणप्रलयोत्पन्नकर्म-नित्यरूपादौ हेतुतावच्छेदकसंयोगसम्बन्धेन वृत्तेरप्रसिद्ध्या वह्निमान् धूमादित्यत्रैवाव्याप्तिसम्भवे अतिव्याप्त्यभिधानमसंगत-मिति वाच्यम्। यथाश्रुताभिप्रायेणातिव्याप्तेरभिहितत्वात्। हेतुतावच्छेदकसम्बन्धेन वृत्तित्वविवक्षणे अग्रे निरुक्तरीत्याऽव्याप्तेरभिधीयमानत्वेन इदानीं तादृशाशंकाया निर्बीजत्वादिति ध्येयम्।

दीधितौ—**साध्यवद्भिन्नस्येति**। सामानाधिकरण्यस्य व्याप्यवृत्तितया धूमवान् वह्नेरित्यादौ वह्निसामानाधिकरण्याभावस्य धूमादिनिष्ठत्वाभावेऽपि इत्यादिः। साध्यवतः धूमादिमतो भिन्नस्यायोगोलकादेरित्यर्थः। **साध्येति**। धूमादिनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वात्, तद्वृत्तौ = धूमादिमद्भिन्नायोगोलकादिवृत्तिवह्न्यादौ। **नातिप्रसङ्गइति**। तथा च व्यभिचारिमात्रे एव साध्यवद्भिन्नस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणतया तद्वृत्तित्वस्य हेतौ सत्त्वान्नातिप्रसंग इति भावः। तद्वृत्तावित्यस्य व्याख्यामाह टीकायां **साध्यवद्भिन्नेति**। साध्यवद्भिन्ने वृत्तिर्वृत्तित्वं यस्य, साध्यवद्भिन्नासाध्यवद्भिन्ननिरूपितावृत्तिर्वृत्तिता वा यस्य तादृशे हेतावित्यर्थः। निरुक्तलक्षणस्य निष्कर्षं प्रदर्शयतां दीधितिकाराणामभिप्रायं वर्णयितुं शंकते—**नन्विति**। **हेतुताघटकेति**। हेतुतावच्छेदकसंसर्गतावच्छेदकतापर्य्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गेणेत्यर्थः। तेन न धूमसाध्यकमहानसीयसंयोगेन वह्निहेतौ धूमनिष्ठाधेयत्वानिरूपकायोगोलकनिरूपितशुद्धसंयोगावच्छिन्नवृत्तित्वस्य वह्नौ सत्त्वेप्यव्याप्तिः। न वा वह्निसाध्यकसंयोगकालिकोभयसम्बन्धेन धूमहेतौ वह्निनिष्ठाधेयत्वानिरूपकजलादिनिरूपितकेवलकालिकसम्बन्धावच्छिन्नवृत्तित्वस्य धूमे सत्त्वेऽप्यव्याप्तिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

हेतुताघटकसम्बन्धेन वाच्यमन्यथा वन्हिनिष्ठाधेयत्वानिरूपके स्वावयवे समवायादिना धूमादेः सत्त्वादव्याप्त्यापत्तेः। तथा च सत्तावान्द्रव्यत्वाद्धूमाद्वेत्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपके जात्यादौ समवायेन संयोगेन वा वृत्त्यप्रसिद्धेः। किं च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः।

❀ विवृतिः ❀

अन्यथेति—हेतुताघटकसम्बधेन साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वस्याविवक्षणे इत्यर्थः। स्वावयवे = धूमाद्यवयवादौ, आदिना जलादिपरिग्रहः। तेन न न्यूनत्वम्। **समवायादिनेति**। आदिना कालिकपरिग्रहः। धूमादेरित्यादिनाऽऽलोकपरिग्रहः। **सत्त्वादितीति**। तथा च धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणधूमावयवनिरूपितसमवायावच्छिन्नवृत्तित्वस्य धूमे सत्त्वेन तदनधिकरणत्वस्य धूमे विरहात् भवत्यव्याप्तिर्यदि हेतुतावच्छेदकसम्बन्धेन तादृशवृत्तित्वप्रवेशो न स्यादिति भावः। गगनभिन्नं घटत्वादित्यादौ गगनभेदनिष्ठाधेयत्वाऽनिरूपके गगने केनापि सम्बन्धेन घटत्वस्यावृत्तेस्तत्र लक्षणसमन्वयसम्भवेनासम्भवाभावादाह—**अव्याप्त्यापत्तेरिति**। **तथाचेति**। तादृशवृत्तित्वस्यावश्यं हेतुताघटकसम्बन्धेन विवक्षणीयत्वे चेत्यर्थः। समवायेन हेतौ यथाऽव्याप्तिस्तथा संयोगेनापि हेतौ सम्भवतीत्याह—**धूमाद्वेति**। सत्तानिष्ठाधेयत्वाऽनिरूपके सामान्यादौ हेतुतावच्छेदकसमवायेन संयोगेन च वृत्तेरप्रसिद्ध्या तत्र तत्राव्याप्तिरित्याह—**साध्येति**।

न च स्वरूपहेतुताघटकान्यतरसम्बन्धेन तादृशवृत्तित्वविवक्षणे नेयमव्याप्तिरिति वाच्यम्। प्रमेयस्य कालिकेन साध्यतायां कालिकेन वाच्यत्वहेतावव्याप्त्यापत्तेः, प्रमेयनिष्ठाधेयत्वानिरूपकाधिकरणीभूतात्मादिनिरूपिततादृशान्यतरसम्बन्धावच्छिन्नवृत्तित्वस्य वाच्यत्वे सत्त्वात्। ननु हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाधिकरणत्वीयस्वरूपसम्बन्धेन साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वाधिकरणत्वाभावस्य व्याप्तित्वे न सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः, समवायावच्छिन्नवृत्तित्वाधिकरणत्वीयस्वरूपसम्बन्धेन सत्तानिष्ठाधेयत्वानिरूपकसामान्यादिवृत्तित्वाधिकरणत्वस्य कुत्राप्यसत्त्वेन तद्विरहस्य द्रव्यत्वरूपहेतौ सत्त्वादत आह—**किञ्चेति**। **विशिष्टसत्तायांसत्त्वादिति**। सत्तानिष्ठस्य गुणवृत्तित्वाधिकरणत्वस्याभावस्य विशिष्टसत्तानिष्ठत्वे मानाभावः; विशेष्यवृत्तिपदार्थस्य विशिष्टानुयोगिकाभावानभ्युपगमात् इत्याशयः। इदं च यथाश्रुताभिप्रायेण। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तितावच्छेदकतायाः—पर्याप्तिसम्बन्धेनानधिकरणधर्मवत्त्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिक-

❀ जागदीशी ❀

द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह—साध्यनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपके जलादौ वन्ह्यधिकरण-

❀ विवृतिः ❀

स्य व्याप्तित्वे तु न द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिः, द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणवृत्तितावच्छेदकतायाः सत्तात्वनिष्ठायाः पर्य्याप्तिसम्बन्धेनानधिकरणत्वस्य वैशिष्ट्यसत्तात्वे सत्त्वादिति ध्येयम् ॥

दीधितौ-साध्यनिष्ठेति। तथा च यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्ननिरूपकतानिरूपिताधिकरणतात्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधेयत्वाऽनिरूपकाधिकरणत्वव्यापकतावच्छेदकं तद्धर्मवत्त्वं व्याप्तिरिति तात्पर्य्यम्। वह्निमान् धूमादित्यादौ धूमत्वरूपयद्धर्मावच्छिन्नसंयोगावच्छिन्नाधिकरणत्वाभावस्य तादृशवह्निनिष्ठाधेयत्वानिरूपकाधिकरणतावती यावत्येव जलह्रदादौ सत्त्वेन तादृशधूमत्वावच्छिन्नाधिकरणत्वाभावत्वस्य वह्निनिष्ठाधेयताऽनिरूपकाधिकरणताव्यापकतावच्छेदकतया तादृशधूमत्वरूपधर्मवत्त्वस्य धूमे सत्त्वाल्लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तु वह्नित्वरूपयद्धर्मावच्छिन्नसंयोगावच्छिन्नाधिकरणत्वाभावस्य तादृशधूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावत्ययोगोलकेऽसत्त्वात् तादृशवह्न्यधिकरणत्वाभावत्वस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणताव्यापकतानवच्छेदकत्वेन यद्रूपपदेन वह्नित्वस्य धर्तुमशक्यत्वात् नातिव्याप्तिरिति संक्षेपः। **तेनेति।** साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वानधिकरणत्वरूपं लक्षणार्थं परित्यज्य निरुक्तरीत्या लक्षणार्थकरणेनेत्यर्थः। न दोषः = न सत्तानिष्ठाधेयत्वाऽनिरूपकाधिकरणसामान्यादिनिरूपितहेतुतावच्छेदकीभूतसमवायावच्छिन्नवृत्तित्वाऽप्रसिद्ध्याऽव्याप्तिः। द्रव्यत्वत्वावच्छिन्नसमवायावच्छिन्नाधिकरणत्वाभावस्य सत्तानिष्ठाधेयत्वाऽनिरूपकाधिकरणतावती सर्वत्रैव सामान्यादौ सत्त्वात् तादृशद्रव्यत्वत्वरूपयद्धर्मावच्छिन्नाधिकरणत्वाभावत्वस्य निरुक्तसत्तानिष्ठाधेयत्वानिरूपकाधिकरणताव्यापकतावच्छेदकतया यद्रूपपदेन द्रव्यत्वत्वस्य धर्तुं शक्यत्वात्, निरुक्तनिष्कर्षे न सत्तावान् द्रव्यत्वादित्यत्राव्याप्तिरिति भावः। ननु साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणतासमानाधिकरणीभूतो योऽभावस्तत्प्रतियोग्यधिकरणताकत्वमेव लाघवात् व्याप्तिरस्तु, कृतं व्यापकत्वानिवेशनेत्याशंक्य व्यापकत्वनिवेशस्य प्रयोजनमाह टीकायां—धूमनिष्ठेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

रणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ

❀ जागदीशी ❀

त्वाभावसत्त्वाद्व्यभिचारिण्यतिव्याप्तिरतो व्यापकेति । व्यापकत्वं तु प्रतियोगिवैयधिकरण्याघटितमेव ग्राह्यम् । तेन संयोगेन वन्ह्यधिकरणत्वस्या-

❀ विवृतिः ❀

तथा च व्यापकत्वाऽनिवेशे धूमवान् वह्नेरित्यत्रातिव्याप्तिः, धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावति जलादौ वह्न्यधिकरणत्वाभावस्य सत्त्वेन धूमनिष्ठाधेयत्वानिरूपकाधिकरणतासमानाधिकरणीभूतस्य वह्न्यधिकरणत्वाभावस्य प्रतियोगि यत् वह्न्यधिकरणत्वं तत्कत्वस्य वह्नौ सत्त्वादिति हृदयम् । व्यापकत्वनिवेशे तु न तत्रातिव्याप्तिः । धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावत्ययःपिण्डे वह्न्यधिकरणत्वाभावस्य विरहादित्याह—व्यापकेतीति । नन्वत्र व्यापकत्वं यदि स्वप्रतियोग्यनधिकरणीभूतं यत् साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणं तन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं तदा धूमवान् वह्नेरित्यत्रातिव्याप्तिः वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणस्यायोगोलकस्य वह्न्यधिकरणत्वाभावाभावप्रतियोगिनो वह्न्यधिकरणत्वाभावस्याधिकरणतया स्वप्रतियोग्यनधिकरणतादृशायोगोलकनिष्ठाभावपदेन वह्न्यधिकरणत्वाभावाभावस्योपादानाऽसम्भवात् तादृशघटाद्यभावप्रतियोगितानवच्छेदकत्वस्य वह्न्यधिकरणत्वाभावत्वे सत्त्वेन वह्न्यधिकरणत्वाभावस्य धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतया तत्प्रतियोगिवह्न्यधिकरणताकत्वस्य वह्नौ सत्त्वादत आह—व्यापकत्वंत्वित्यादि । प्रतियोगीति । स्वप्रतियोग्यनधिकरणसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणघटितइत्यर्थः । तथा च केवलसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकधर्मस्वरूपस्य व्यापकत्वस्य निवेशेऽप्यव्याप्यवृत्तिसाध्यकाव्याप्यवृत्तिहेतौ कपिसंयोगी एतद्विहंगमसंयोगादित्यादौ कपिसंयोगनिष्ठाधेयत्वाऽनिरूपकाधिकरणे गुणादौ एतद्विहंगमसंयोगाभावाभावाऽसत्त्वेन एतद्विहंगमसंयोगाभावस्य कपिसंयोगनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतया लक्षणसमन्वयसम्भवे प्रयोजनविरहेण यथोक्तरीत्या प्रतियोगिवैयधिकरण्यघटितं व्यापकत्वं न निवेशनीयमिति भावः । तदघटितव्यापकत्वनिवेशस्य प्रयोजनमाह—तेनेति । प्रतियोगिवैयाधिकरण्याघटितव्यापकत्वस्य निवेशेनेत्यर्थः । अव्याप्यवृत्तितया = तादृशवह्न्यधिकरणत्ववति वर्त्तमानस्याभावस्य प्रतियोगितया । अग्रिमवृत्तित्वेऽपीत्यत्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

व्याप्यवृत्तितया तदभावस्य तप्तायःपिण्डवृत्तित्वेऽपि नातिव्याप्तिः । वन्ह्यधिकरणत्वगगनोभयत्वाद्यवच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदम् । तथा च हेतुतावच्छेदकसम्बन्धा-

❀ विवृतिः ❀

वृत्तित्वेनान्वयिप्रयोज्यत्वं तृतीयार्थः । तदभावस्य = तादृशवह्न्यधिकरणत्वाभावस्य । वृत्तित्वेऽपि = सत्त्वेऽपि । तदनधिकरणत्वस्यायोगोलके विरहेपीति तु परमार्थः । नातिव्याप्तिरिति । तथा च प्रतियोगिवैयधिकरण्याघटितस्य धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणायोगोलकवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकत्वस्य वह्न्यधिकरणत्वाभावे सत्त्वमेव न सम्भवति तादृशायोगोलके वह्न्यधिकरणत्वाभावाभावस्य विद्यमानतया तत्प्रतियोगितावच्छेदकताया एव वह्न्यधिकरणत्वाभावत्वे सत्त्वादतो न धूमवान् वह्नेरित्यत्रातिव्याप्तिरिति भावः ॥

दीधितिस्थसामान्यपदप्रयोजनमाह—वह्न्यधिकरणत्वेति । तथा च सामान्यपदानुपादाने धूमवान् वह्नेरित्यत्रातिव्याप्तिः, वह्न्यधिकरणत्वगगनोभयत्वावच्छिन्नाभावस्य केवलान्वयितया सर्वत्र सत्त्वेन धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणे तप्तायःपिण्डे वह्न्यधिकरणत्वगगनोभयाभावाभावस्यासत्त्वेन तादृशोभयाभावस्य धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वव्यापकतया तदीयप्रतियोगिघटद्वह्न्यधिकरणत्वं तत्कत्वस्य वह्नौ सत्त्वादिति भावः । ननु सामान्यपदोपादानेऽपि धूमवान् वह्नेरित्यादावतिव्याप्तिरस्त्येव धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वव्यापकीभूतस्य निरुक्तोभयाभावस्य प्रतियोगितायाः वह्न्यधिकरणत्वसामान्ये सत्त्वात् एवं व्यापकत्वं तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपमपि वह्न्यधिकरणत्वसामान्याभावेऽक्षतमेव धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावति प्रमेयाभावस्याऽसत्त्वेन तत्र वर्त्तमानस्य घटाद्यभावस्य प्रतियोगितानवच्छेदकीभूतप्रमेयत्ववत्त्वस्य वह्न्यधिकरणत्वाभावे सत्त्वादतः सामान्यपदघटितसमुदितलक्षणार्थमाह—तथा चेति । हेतुनेति । हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्ननिरूपकताकाधिकरणतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनेत्यर्थः । अर्थः = समुदितलक्षणार्थः । वह्न्यधिकरणत्वगगनोभयाभावनिष्ठा धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकता तु न वह्न्यधिकरणतात्वावच्छिन्नप्रतियोगिताकाभावत्वेनापि तु तादृशोभयत्वावच्छिन्नाभावत्वेन; निरुक्तोभयाभावे वह्न्यधिकरणतात्वमात्रावच्छिन्नप्रतियोगिताकत्वविरहादिति वह्नित्वरूपयद्धर्मावच्छिन्नाधिकरणतात्वमात्रावच्छिन्नप्रति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः। तेन वन्हिनिष्ठाधेयत्वानिरूपकाधिकरणे जलादौ कालिकादिसम्बन्धेन धूमाधिकरणतायाः सत्त्वेऽपि नाव्याप्तिः। न वा वन्ह्यधिकरणत्वाभावस्यापि प्रमेयत्वादिना धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेप्यतिव्याप्तिः। न च हेतुतावच्छेदकसम्बन्धेन यद्धर्मा-

❀ विवृतिः ❀

योगिताकाभावत्वेन धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकताया असम्भवेन यद्धर्मपदेन वह्नित्वस्य धर्तुमशक्यत्वात् न धूमवान् वह्नेरित्यत्रातिव्याप्तिरित्याशयः।

हेतुतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वविवक्षायाः फलमाह—तेनेति। हेतुताघटकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वस्य प्रवेशेनेत्यर्थः। तथा च वह्निमान् धूमादित्यादौ वह्निनिष्ठाधेयत्वाऽनिरूपकाधिकरणे जलादौ कालिकसम्बन्धेन धूमत्वावच्छिन्नाधिकरणतायाः अभावाऽसत्त्वेन धूमत्वावच्छिन्नाधिकरणत्वाभावस्य वह्निनिष्ठाधेयत्वानिरूपकाधिकरणत्वाऽव्यापकत्वात् यद्धर्मपदेन धूमत्वस्योपादानासंभवात् अव्याप्तिः स्यात् यदि हेतुताघटकसम्बन्धेन यद्धर्मावच्छिन्नाधिकरणत्वप्रवेशो न स्यादिति भावः। जलादावित्यत्रादिना धूमावयवपरिग्रहः। कालिकादि—इत्यत्रादिना समवायसम्बन्धपरिग्रहः। नाव्याप्तिरिति अत्राव्याप्तिदानं तु सम्बन्धसामान्यावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वप्रवेशमभिप्रेत्य, यत्किंचित्सम्बन्धेन तादृशाधिकरणत्वप्रवेशे तु धूमवान् वह्नेरित्यत्रातिव्याप्तिरेवेत्यवधेयम्। यद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावस्य व्यापकत्वमनुक्त्वा तादृशाभावत्वेन व्यापकताया प्रवेशे प्रयोजनमाह—न वेति। अतिव्याप्तिरिति परेणान्वयः। वह्न्यधिकरणत्वाभावस्यापि = वह्नित्वावच्छिन्नाधिकरणत्वत्वमात्रावच्छिन्नप्रतियोगिताकाभावस्यापि। प्रमेयत्वादिनेति। तृतीयार्थोऽवच्छिन्नत्वं व्यापकत्वान्वयि बोध्यम्। धूमनिष्ठेति। धूमनिष्ठाधेयत्वानिरूपकाधिकरणतावन्निष्ठस्य घटाभावादेर्वह्न्यधिकरणत्वाभावाऽभावस्यापि प्रतियोगिताया अनवच्छेदकीभूतं यत् प्रमेयत्वं तद्वत्त्वेऽपीत्यर्थः। नातिव्याप्तिरिति। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकधर्मावच्छिन्नाधेयत्वाऽनिरूपकाधिकरणतावन्निष्ठस्याभावस्य प्रतियोगितानवच्छेदकं यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वत्वमात्रावच्छिन्नप्रतियोगिताकाभावत्वं तद्धर्मवत्त्वमित्येवं तादृशाधिकरणत्वाभावत्वेन व्यापकताप्रवेशपक्षे लक्षणार्थः। तथा च न धूमवान् वह्नेरित्यत्रातिव्याप्तिः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वच्छिन्नाभावत्वेन तादृशाधिकरणताया व्यापकत्वमित्यस्यैव सम्यक्त्वेऽधिकरणत्वप्रवेशो व्यर्थ इति वाच्यम् । वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिप्रसङ्गात । तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः ।

❀ विवृतिः ❀

तादृशधूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावति तप्तायःपिण्डे वह्नित्वावच्छिन्नाधिकरणत्वाभावत्वावच्छिन्नाभावस्य सत्त्वेन तदीयप्रतियोगितावच्छेदकताया एव वह्नयधिकरणत्वाभावत्वे सत्त्वात् यद्धर्मपदेन वह्नित्वस्य धर्तुमशक्यत्वादिति भावः ।

वस्तुतो यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वसामान्याभावत्वावच्छिन्नाभावस्तादृशसाध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावत्यवर्त्तमानस्तद्धर्मवत्त्वं लक्षणार्थः । वह्नित्वावच्छिन्नतथाविधाधिकरणत्वाभावत्वावच्छिन्नाभावस्य तादृशधूमनिष्ठाधेयत्वाऽनिरूपकेऽयःपिण्डे वर्त्तमानत्वान्न धूमवान् वह्नेरित्यत्रातिव्याप्तिर्न वा वह्निमान् धूमादित्यत्राव्याप्तिः । वह्निनिष्ठाधेयत्वानिरूपके जलादौ धूमत्वावच्छिन्नाधिकरणत्वसामान्याभावत्वावच्छिन्नाभावस्यासत्त्वादितिध्येयम् । ननु लाघवात् साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतावच्छेदकं यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं तद्धर्मवत्त्वमेव व्याप्तिरस्तु यद्धर्मावच्छिन्नाधिकरणत्वाभावत्वस्य व्यापकतावच्छेदकत्वाऽविवक्षणेऽपि न धूमवान् वह्नेरित्यत्रातिव्याप्तिः धूमनिष्ठाधेयत्वाऽनिरूपके तप्तायःपिण्डे वह्नित्वावच्छिन्नाभावस्याऽसत्त्वेन तादृशाभावत्वस्य धूमनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतानवच्छेदकत्वात्, न वा वह्निमान् धूमादित्यादावव्याप्तिः धूमत्वावच्छिन्नाभावाभावस्य वह्निनिष्ठाधेयत्वानिरूपके जलादावसत्त्वेन धूमत्वावच्छिन्नाभावत्वस्य वह्निनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतावच्छेदकत्वादित्याशंकते—न चेति । वाच्यमितिपरेणान्वयः ।

वृत्त्यनियामकेति । चैत्रत्वसाध्यके स्वामित्वसम्बन्धेन तद्धनहेतावव्याप्तिरितिभावः । तादृशेति । स्वामित्वसम्बन्धावच्छिन्नप्रतियोगित्वाऽप्रसिद्धेरित्यर्थः । समवायादिसम्बन्धेन तद्धनाद्यभावस्य चैत्रत्वनिष्ठाधेयत्वाऽनिरूपके तद्धनावयवेऽसत्त्वेन हेतुतावच्छेदकसम्बन्धेन हेत्वभावस्यैव व्यापकताया वक्तव्यतया स्वामित्वसम्बन्धेन तद्धनाभावाऽप्रसिद्धेस्तस्य व्यापकत्वमप्यप्रसिद्धमिति भावः । ननु हेत्वधिकरणत्वाभावत्वेन व्यापकतायाः विवक्षणेऽपि वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिर्दुर्वारैव तेन सम्बन्धेनाधिकरणत्वस्याप्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

अस्माकं तु तादृशसम्बन्धेन यद्धेतुसम्बन्धित्वं तस्य स्वरूपसम्बन्धावच्छिन्नाभावमादाय लक्षणसम्भवात्। किं चाधिकरणत्वाप्रवेशे वन्ह्यादेः साध्यत्वे संयोगादिसम्बन्धेन रूपादिहेतावतिव्याप्त्यापत्तिः। संयोगेन रूपाद्यभावस्य केवलान्वयितया वन्हिनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्याप-

❀ विवृतिः ❀

प्रसिद्धेरत **आह—अस्माकन्त्विति**। हेत्वधिकरणत्वाभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणताव्यापकतावादिनामित्यर्थः। तथा चास्मन्मते यद्धर्मावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नसम्बन्धित्वसामान्याभावत्वं साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणत्वव्यापकतावच्छेदकं तद्धर्मवत्त्वमित्यस्यैव लक्षणार्थतया न वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिः, तेन सम्बन्धेनाधिकरणत्वाऽप्रसिद्धावपि तत्सम्बन्धावच्छिन्नसम्बन्धित्वस्य प्रसिद्धतया स्वामित्वेन तद्धनत्वावच्छिन्नसम्बन्धित्वस्य स्वरूपेणाभावत्वस्य चैत्रत्वनिष्ठाधेयत्वाऽनिरूपकाधिकरणताव्यापकतावच्छेदकतया यद्धर्मपदेन तद्धनत्वमादायैव लक्षणसमन्वयसम्भवादिति भावः।

तादृशसम्बन्धेन = वृत्त्यनियामकस्वामित्वादिसम्बन्धेन। यद्धेतुसम्बन्धित्वं = यत् तद्धनादिसम्बन्धित्वं। तस्य = तादृशसम्बन्धित्वस्य। कालिकसम्बन्धावच्छिन्नतद्धनादिसम्बन्धित्वाभावस्य चैत्रत्वनिष्ठाधेयत्वानिरूपकजन्यमहाकालादाववर्तमानत्वादाह **स्वरूपेति**। लक्षणसम्भवात् सर्वत्रैव सद्धेतावितिशेषः। वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वमते तेन सम्बन्धेन व्याप्यव्यापकभावानभ्युपगमे वा लाघवात् हेत्वभावत्वेनैव तादृशाधिकरणताव्यापकत्वविवक्षणे दोषाभावादाह **किंचेति**।

यत्तु व्यधिकरणसम्बन्धानवच्छिन्नत्व,हेतुतावच्छेदकसंसर्गातिरिक्तसम्बन्धावच्छिन्नत्वोभयाभाववद्यद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वेन व्यापकताप्रवेशे व्यधिकरणस्वरूपादिसम्बन्धेन हेत्वभावमादायैव वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिवारणादाह **किञ्चेतीति** मतं तत्तुच्छं—

तथासति वृत्त्यनियामकसम्बन्धेन व्यभिचारिणि हेतावप्यतिव्याप्तिसम्भवेऽग्रे व्यधिकरणसम्बन्धेन रूपादिहेतावतिव्याप्तिदानस्यासंगतत्वापत्तेरिति ध्येयम्। अतिव्याप्तिमुपपादयति **संयोगेनेति**। केवलान्वयितयेत्यनेन संयोगेन रूपाभावस्याभावाऽप्रसिद्ध्या तस्य वस्तुमात्रव्यापकत्वं स्फुटीकृतम्। **व्यापकत्वादिति**। वह्निनिष्ठाधेयत्वाऽनिरूपकाधिकरणतावति सर्वत्रैव जलादौ संयोगेन रूपत्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साध्यवैयधिकरण्याऽनधिकरणत्वं वा ।

❀ दीधितिः ❀

न दोषः । साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वम् ।

❀ जागदीशी ❀

कत्वादिति भावः । साध्यवद्भिन्नेति । अत्रापि साध्यवद्भिन्नत्वव्यापकाभाव-

---

❀ विवृतिः ❀

वच्छिन्नाभावस्य विद्यमानतया तादृशरूपत्वावच्छिन्नाभाववत्त्वस्य तादृशाधिकरणताव्यापकतावच्छेदकत्वेन रूपत्वस्य यद्धर्मपदेनोपादानसम्भवादिति हृदयम् ।

न च हेतुतावच्छेदकसम्बन्धावच्छिन्ननिरूपकतावच्छेदकीभूतो यो धर्मस्तद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वेन व्यापकताविवक्षणे नेयमतिव्याप्तिः, संयोगावच्छिन्ननिरूपकतावच्छेदकत्वस्य रूपत्वे विरहादिति वाच्यम् । तथा सति गौरवात् । न चाधिकरणत्वाप्रवेशे द्रव्यत्वनिष्ठाधेयत्वानिरूपके गुणादौ विशिष्टसत्तात्वावच्छिन्नाभावाभावस्य वर्तमानतया द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिसंभवेऽतिव्याप्तिदानमसंगतमिति वाच्यम् । साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणतानिरूपकतावच्छेदकानुयोगितानिरूपितप्रतियोगितानवच्छेदकं यद्धर्मावच्छिन्नाभावत्वं तद्धर्मवत्त्वस्य विवक्षणीयतया उक्तस्थलेऽव्याप्तेरभावादिति तु विभावनीयम् ।

इदमत्रावधातव्यम्—अधिकरणत्वतत्सामान्यादिकमनिवेश्य लाघवात् हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदत्वेन तादृशव्यापकतायाः विवक्षणमेव समुचितं । न च वृत्त्यनियामकसम्बन्धेन हेतुतायामव्याप्तिः, तादृशसम्बन्धावच्छिन्नप्रतियोगित्वस्याप्रसिद्धावपि तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकतायाः सर्ववादिसिद्धतया वृत्त्यनियामकसम्बन्धेन हेतुमद्भेदमादायैव लक्षणसमन्वयसम्भवात् न वा व्यधिकरणसंयोगसम्बन्धेन रूपादेर्वह्न्यादिव्याप्यत्वापत्तिः । तेन सम्बन्धेन रूपादिमत एवाप्रसिद्धत्वात् ।

न च तादात्म्यसम्बन्धस्यापि वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकहेतुमद्भेदाऽप्रसिद्धिरिति वाच्यम्, अखण्डोपाधेरपसिद्धान्तकवलिततया तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वस्यैव भेदत्वस्वरूपतया तत्सम्बन्धावच्छिन्नप्रतियोगित्वस्यावश्यकत्वात् । भेदत्वस्याऽखण्डोपाधित्वे हेतुमद्भेदत्वस्यापि तथात्वसम्भवाच्चेति ।

दीधितौ **साध्यवद्भिन्नेति** । साध्यवद्भिन्नमधिकरणं यस्येति तत्त्वं साध्यवैयधिकरण्यं तदनधिकरणत्वमित्यर्थः । तथा च साध्यवद्भिन्नवृत्तित्वाऽनधिकरण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

प्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षो बोध्यः । तेन सत्तावान्द्रव्यत्वादित्यादौ नाव्याप्तिः । ननु प्रागुक्तस्यार्थस्य शब्दान्तरेणाभिधानमनुवादः, स चात्रासम्भवी, साध्यं यदधिकरणानधिकरणं तत्त्वानधिकरणत्वस्य साध्यव-

❀ विवृतिः ❀

त्वमेव व्याप्तिरिति पर्य्यवसितम् । एवमपि सत्तावान् जातेरित्यत्राव्याप्तिः, सत्तावद्भिन्ननिरूपितसमवायावच्छिन्नवृत्तित्वाऽप्रसिद्धेरत आह टीकायाम्—अत्रापीति । षष्ठ्यर्थेऽत्र सप्तमी, निरुक्तलक्षणस्यापीत्यर्थः । साध्यवद्भिन्नत्वेति । तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदत्वावच्छिन्ननिरूपकतानिरूपिताधिकरणत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वं तद्धर्मवत्त्वं समुदितनिष्कर्षो ग्राह्यः । तेन न पूर्वोक्तदोषाणामवकाश इत्याशयः ।

तेनेति । निरुक्तनिष्कर्षेणेत्यर्थः । **नाव्याप्तिरिति** । सत्तावद्भिन्नसमवेतत्वस्याप्रसिद्धत्वेऽपि सत्तावद्भिन्नत्वव्यापकतायाः द्रव्यत्वाधिकरणत्वाभावे सत्त्वान्नाव्याप्तिरिति भावः । साध्यासामानाधिकरण्यानधिकरणत्वमित्यस्य साध्याधिकरणभिन्नं यस्याधिकरणं तत्त्वानधिकरणत्वार्थकत्वं पूर्वमभिहितं, एवं साध्यवैयधिकरण्यानधिकरणत्वमित्यस्यापि साध्याधिकरणभेदाधिकरणवृत्तित्वानधिकरणत्वार्थकत्वं पूर्वमेव दीधितिकृताऽभिहितं, तथा च निरुक्तस्यापि लक्षणद्वयस्य अधिकरणताश्रयघटितार्थकतया तादृशाधिकरणताश्रयबोधकशब्दान्तरस्यैवानुवादस्वरूपतया साध्यानधिकरणानधिकरणत्वशब्दस्यानुवादत्वमेव न सम्भवति तेनाधिकरणताद्वयस्यैव बोधनादिति साध्यानधिकरणत्वादेर्मूलस्यानुवादत्वप्रदर्शनपरं **चरमे**त्यादिदीधितिग्रन्थमवतारयितुं शंकते **नन्विति** ।

प्रागुक्तस्यापि स्वशून्यत्वे सति स्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकविषयतासमनियतविषयताकबोधजनकतावच्छेदकानुपूर्वीमान् शब्दोऽनुवादः, स्वं, अव्यवहितोत्तरत्वादिसम्बन्धेन एकवर्णविशिष्टापरवर्णत्वरूपानुपूर्वी, स चासम्भवीति समुदितार्थः । तेन न प्रमेयमस्तीत्यादिवाक्यप्रतिपाद्यार्थबोधकवाक्यान्तरस्य घटोऽस्तीत्यादिवाक्यस्यानुवादकत्वं, न वा घटोस्तीत्यादिवाक्यप्रतिपाद्यार्थबोधकस्य प्रमेयमस्तीत्यादिवाक्यस्यानुवादकत्वं, उच्चारणभेदेन घटोऽस्तीतिवाक्यस्य भिन्नतया घटास्तित्वबोधकस्य तस्यैवानुवादकत्ववारणाय शब्दभिन्नत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदुभयमपि साध्याऽनधिकरणाऽनधिकरणत्वम्, तच्च तत्र यत्किञ्चित्साध्याऽनधिकरणाऽधिकरणे धूमे चाऽप्रसिद्धम् ❀ इति चिन्तामणिः ❀

❀ दीधितिः ❀

चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अनूद्य दूषयति—तदुभयमपीति। साध्येत्यादेः साध्यं यदधिकरणाऽनधिकरणंतत्त्वाभावः। साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव-

❀ जागदीशी ❀

द्भिन्नवृत्तित्वानधिकरणत्वस्य च प्रागुक्तस्य साध्यानधिकरणानधिकरणत्व-शब्देनाबोधनादत आह—**चरमेति**। तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्या-प्रवेशाद्वैयर्थ्यमसम्भवीत्यत उक्तम्—**अनतिप्रयोजनकतयेति**। तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे

❀ विवृतिः ❀

मुपेक्ष्य शब्दवृत्त्यानुपूर्वीशून्यत्वनिवेशः। घटोऽस्तीत्यादिवाक्यजन्यपटविषयकस-मूहालम्बनबोधविषयसमुदायाप्रकाशकस्य कम्बुग्रीवादिमानस्तीतिवाक्यस्यानु-वादकत्वानुपपत्तिवारणाय जन्यतावच्छेदकत्वानुसरणमिति ध्येयम्। अनुवादा-सम्भवे हेतुम् प्रदर्शयन्पूर्वाभिहितस्य प्रथमलक्षणस्यार्थमाह—**साध्यमित्यादि**। तथाविधस्य द्वितीयलक्षणस्यार्थमाह—**साध्यवद्भिन्नेति**।

अबोधनादिति। प्रागभिहितस्याधिकरणतात्रयस्य निरुक्तमूलेनाबोधनात् तेनाधिकरणताद्वयस्यैव बोधनादितिभावः।

ननु साध्यं यदधिकरणानधिकरणं तत्त्वाधिकरणत्वाभावत्वस्य स्वसमानाधिकर-णेन प्रकृतसाध्यीभूतव्याप्तीतरभेदव्याप्यतावच्छेदकेन तादृशतत्त्वाभावत्वेन घटित-तया व्याप्तीतरभेदानुमापकतावच्छेदकत्वमेव न तस्य सम्भवति इति दीधितौ त-त्त्वाधिकरणत्वांशस्य अनतिप्रयोजनकत्वाभिधानमसंगतं तस्य वैयर्थ्यसम्भवादित्यत आह—**तत्त्वेति**। तथा च तादृशतत्त्वाधिकरणत्वाभावस्याखण्डाभावत्वेन तत्त्वा-भावत्वे तादृशसामानाधिकरण्यविरहेण तत्त्वाधिकरणत्वांशस्य वैयर्थ्याऽसम्भवादुक्तं दीधितौ अनतिप्रयोजनकतयेति भावः।

तत्त्वाभावस्याप्रवेशात् = तत्त्वाभावस्य तादृशाभावाऽघटकत्वात्। अभाव-द्वयस्य परस्परं भिन्नत्वादित्याशयः। चरमाधिकरणत्वाऽप्रवेशे प्रथमलक्षणस्यार्थं प्रदर्शयति—**प्रकृतेति**। प्रथमलक्षणवाक्यस्येत्यर्थः। तत्त्वाभाव एवेत्यत्र एव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

एव तात्पर्यात् प्रागभिप्रेतार्थस्य शब्दान्तरेणाभिधानमेवानुवादः स चात्र सम्भवत्येवेति भावः । **साध्यमित्यादि** । साध्यानधिकरणाऽनधिकरणेत्यादौ मध्यवर्तिनोऽपि नञो व्यत्यासेन चरमाधिकरणत्वांशेन सहा-

❀ विवृतिः ❀

कारेण तत्त्वाधिकरणत्वाभावे तात्पर्य्यव्यत्रच्छेदः । तात्पर्य्यात् = तादृशतत्त्वाभावबोधेच्छयोच्चरितत्वात् । एवं द्वितीयलक्षणस्यापि साध्यवद्भिन्नवृत्तित्वाभाव एव तात्पर्य्यमवगन्तव्यम् । प्रागभिप्रेतार्थस्य साध्याधिकरणभिन्नं यदधिकरणं तत्त्वाभावरूपस्य साध्यवद्भिन्नवृत्तित्वाभावरूपस्य चार्थस्य शब्दान्तरेण साध्यानधिकरणानधिकरणत्वरूपमूलशब्देन सम्भवत्येवेति । तथा चाधिकरणताद्वयबोधकलक्षणद्वयात्मकशब्दभिन्नेन साध्यानधिकरणेत्यादिमूलशब्देनापि अधिकरणताद्वयस्यैव बोधनात् भवत्यनुवाद इतिभावः ।

ननु दीधितौ प्रदर्शितस्य प्रथमलक्षणार्थबोधकस्य यदधिकरणानधिकरणं साध्यं तत्त्वाभावरूपवाक्यस्य यदधिकरणं अनधिकरणं यस्य साध्यस्येत्यादिव्युत्पत्त्या साध्यानधिकरणाधिकरणकस्य तदुत्तरभावप्रत्ययेन तन्निष्ठं वृत्तित्वं, तथा च साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वाभावोऽर्थः; द्वितीयलक्षणार्थबोधकस्यापि साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावइत्यादिवाक्यस्य साध्यवद्भिन्नवृत्तित्वाभावोऽर्थः । एवं च निरुक्तलक्षणार्थद्वयस्य साध्यानधिकरणानधिकरणत्वशब्देनाबोधनात् अनुवादाऽसम्भवतादवस्थमित्याशंकायामाह—**मध्यवर्त्तिनोपीति** । अपिरेवार्थे । मध्यवर्त्तिन एव = साध्यानधिकरणशब्दोत्तरस्यानधिकरणघटकस्य, नञः नञर्थस्याभावस्य, चरमाधिकरणत्वांशेन साध्यानधिकरणाधिकरणत्वेन निरुक्तमूललभ्यार्थेन तल्लाभः = पूर्वाभिहितस्य प्रथमलक्षणार्थस्य द्वितीयलक्षणार्थस्यापीति लाभः, तथा च नञ्व्यत्यासेन साध्यानधिकरणं = साध्यनिष्ठाधेयत्वानिरूपकमधिकरणं । साध्यवद्भिन्नं चाधिकरणं यस्य तत् साध्यानधिकरणाधिकरणं तस्य भावः साध्यानधिकरणाधिकरणत्वं साध्यानधिकरणाधिकरणनिष्ठं वृत्तित्वं नञर्थेन सममन्वयाच्च तादृशवृत्तित्वाभावः प्रत्याय्यते । एवं च निरुक्तव्युत्पत्त्या साध्यनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वाभावस्य साध्यवद्भिन्नवृत्तित्वाभावस्य च लक्षणार्थद्वयस्य मूलोक्तसाध्यानधिकरणानधिकरणत्वशब्देन बोधनात् नानुवादाऽसम्भव इति भावः ।

केचित्तु मध्यवर्त्तिनोऽपीत्यत्रापिना साध्यपदोत्तरनञोऽपि व्यत्यासेन चरमाधि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

र्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणा-प्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वा-

❀ जागदीशी ❀

न्वयादेव तल्लाभ इत्याशयः। **केवलान्वयिनीति**। अव्याप्तिरिति परेणा-न्वयः। अव्याप्तेर्हेतुमाह—**साध्यनिष्ठेति**। नानाव्यक्तिसाध्यके चेति मूलोक्तं धूमहेतुमभिप्रेत्य, तेन शब्दवान् गगनत्वादित्यादौ नानाव्यक्ति-

❀ विवृतिः ❀

करणत्वांशेन सममन्वयमुपगम्य साध्याधिकरणं अनधिकरणं यस्य तत् साध्या-धिकरणानधिकरणं तस्य भावः साध्याधिकरणानधिकरणत्वम्, साध्याधिकरणान-धिकरणनिष्ठं तत्त्वं नञर्थेन सहान्वयाच्च तादृशतत्त्वाभाव इति प्रथमलक्षण-स्यार्थः। द्वितीयस्य तु मध्यवर्त्तिनो नञः व्यत्यासेनैव साध्यानधिकरणाधिकरण-त्वाभावरूपः साध्यवद्भिन्नवृत्तित्वाभावोऽर्थः। इति विभिन्ननञो व्यत्यासेन लक्ष-णार्थद्वयस्य मूलशब्देन बोधनान्नानुवादाऽसम्भव इति व्याचक्रुः।

मूले **तच्चेति**। साध्याधिकरणाधिकरणत्वाभावरूपं चेत्यर्थः। यत्किंचि-दिति। तथा च वह्निमान् धूमादित्यादौ यत्किंचिद्महानसीयवह्नेरनधिकरणाधिक-रणकत्वस्य महानसीयवह्निनिष्ठाधेयत्वाऽनिरूपकाधिकरणवृत्तित्वरूपस्य महानसीय-वह्निमद्भिन्नवृत्तित्वरूपस्य च पर्वतीयधूमे; पर्वतीयवह्नेरनधिकरणाधिकरण-कत्वस्य च तादृशस्य महानसीयधूमे सत्त्वेन निरुक्तरीत्या सर्वस्यैव धूमस्य वह्न्यन-धिकरणाधिकरणकतया तदभावस्य धूमेऽप्रसिद्धत्वादव्याप्तिरिति भावः। वाच्यं ज्ञेयत्वादित्यत्र वाच्यत्वनिष्ठाधेयत्वानिरूपकाधिकरणाऽप्रसिध्या प्रथमलक्षणस्या-व्याप्तिरेवं वह्निमान् धूमादित्यत्रापि पूर्वोक्तरीत्याऽव्याप्तिरित्याह दीधितौ **तत्रेत्यादि**।

ननु नानाव्यक्तिसाध्यकेत्यादिना यदि नानाव्यक्तिसाध्यकमात्रेऽव्याप्तेरभिधानं तदाऽसंगतिः; शब्दवान् गगनत्वादित्यत्र शब्दस्य नानाव्यक्तित्वेऽपि तत्तच्छब्द-निष्ठाधेयत्वाऽनिरूपके पृथिव्यादौ गगनत्वस्याऽवर्तमानत्वेनाव्याप्तेरभावादत आह टीकायां **मूलोक्तेति**। धूमहेतुं = वह्निरूपनानाव्यक्तिसाध्यकधूमहेतुं। तथा च नानाव्यक्तिसाध्यकनानाव्यक्तिहेतावेवाव्याप्तिरिति व्याख्यानेन गगनत्वस्य नाना-त्वाभावेन तत्राव्याप्तिविरहेऽपि न क्षतिः। नानाव्यक्तिसाध्यके इत्यादेर-संगतिरिति समुदिततात्पर्यम्। **न्यूनतामिति**। कुत्रचिद्व्यभिचारिणि अति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

निरूपकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः, क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये, द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितस्तदा

❀ जागदीशी ❀

साध्यकाव्याप्तिविरहेऽपि न क्षतिः। न्यूनतां परिहरति—क्वचिदिति। विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिरित्यर्थः। विशिष्टधर्मावच्छिन्ना-

❀ विवृतिः ❀

व्याप्त्यकथनानुमितावबोधवत् पुरुषोच्चरितस्वरूपां मूलशब्दनिष्ठन्यूनतामित्यर्थः। इत्यादावित्यत्रादिना पृथिव्यन्यत्वविशिष्टद्रव्यत्वसाध्यकरूपादिहेतोः परिग्रहः।

अतिव्याप्तिरिति। तथा च विशिष्टसत्तायाः शुद्धसत्तानतिरिक्ततया साध्यनिष्ठाधेयतापदेन केवलसत्तानिष्ठाधेयतामादाय तदनिरूपके सामान्यादौ जातेरवर्तमानत्वात् भवत्यतिव्याप्तिरिति भावः। ननु नानाव्यक्तिके हेतौ अव्याप्ति-वारणार्थं साध्यनिष्ठाधेयत्वं साध्यतावच्छेदकावच्छिन्नत्वेन विवक्षणीयं तथा च न विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिः। विशिष्टसत्तात्वावच्छिन्नाधेयत्वाऽनि-रूपके सामान्यादौ जातेरवर्तमानत्वादत आह **विशिष्टेत्यादिः।** यथा नीलत्वविशि-ष्टपर्वतत्वाद्यवच्छिन्नं वह्निविशिष्टपर्वतत्वाद्यवच्छिन्नं वा धूमाद्यधिकरणत्वं न शुद्ध-पर्वतत्वाद्यवच्छिन्नाधिकरणत्वतो भिन्नमपि त्वेकमेव तथा विशिष्टसत्तात्वाद्यवच्छि-न्नाधेयत्वमपि न शुद्धसत्तात्वाद्यवच्छिन्नाधेयत्वतो भिन्नम् अपि तु एकमेवेति पर्य्यवसितं तात्पर्य्यम्। इदं च विशेष्यतावच्छेदकत्वमेवाधिकरणतावच्छेदकत्व-मप्यभ्युपगम्याभिहितमिति ध्येयम्।

तथा च साध्यतावच्छेदकावच्छिन्नत्वेन साध्यनिष्ठाधेयतायाः विवक्षणे वह्निमान् धूमादित्यत्राव्याप्तिवारणेऽपि विशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिवारणं न सम्भवति विशिष्टसत्तात्वावच्छिन्नाधेयतायाः केवलसत्तात्वावच्छिन्नाधेयत्वाऽनति-रिक्ततया साध्यतावच्छेदकावच्छिन्नाधेयतापदेन सत्तात्वावच्छिन्नाधेयतामादाय तदनिरूपके सामान्यादौ जातेरवर्तमानत्वादित्याशयः।

दीधितौ **यदीत्यादि।** साध्यतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगि-तकभेदो विवक्षित इत्यर्थः। **केवलान्वयिनीति।** वाच्यत्वसाध्यकज्ञेयत्वहेता-वित्यर्थः। तत्र वाच्यत्वत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदाऽप्रसिद्धेरिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

केवलान्वयिनि, यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नाना-

❀ जागदीशी ❀

धिकरणत्वस्येव तदवच्छिन्नाधेयत्वस्यानतिरिक्तत्वादिति भावः। यत्किञ्चि-दिति। साध्यवत्तत्तव्यक्तित्वावच्छिन्नभेद इत्यर्थः। नानाधिकरणसाध्य-केति। यत्र सध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः। तेन कस्या-श्चिदपि वह्निव्यक्तेर्नानाधिकरणवृत्तित्वविरहेऽपि न वह्निसाध्यकधूमाद्यसंग्रहः।

❀ विवृतिः ❀

भावः। यदि चेत्यादि। साध्यनिष्ठावच्छेदकताकप्रतियोगिताकभेदः विवक्षित इति पूर्वेणान्वयः।

नानेति। वह्न्यादिसाध्यकधूमादौ। सर्वत्र = केवलान्वयिनि, केवलान्वयि-भिन्ने च—अव्याप्तिरिति। तथा च वह्निमान् धूमादित्यादौ वह्निमत्पर्वतभेद-मादाय तदधिकरणे महानसादौ धूमस्य वृत्तित्वादव्याप्तिः। द्रव्यं पृथिवीत्वादित्यादौ च द्रव्यत्ववद्घटव्यक्तिभिन्ने पटादौ पृथिवीत्वस्य विद्यमानत्वादव्याप्तिः। केवला-न्वयिनि वाच्यं ज्ञेयत्वादित्यादावपि वाच्यत्ववत्पटादिभिन्ने घटादौ ज्ञेयत्वस्य वर्त्तमानत्वादव्याप्तिरिति भावः।

ननु साध्यनिष्ठावच्छेदकताकप्रतियोगिताकभेदवदवृत्तित्वस्य द्वितीयलक्षणा-र्थत्वे नानाव्यक्तिसाध्यके शब्दवान् गगनत्वादित्यत्राव्याप्त्यभावेन नानाधिकरण-साध्यक एवाव्याप्तेरभिहितत्वादसंगतिः; कस्यापि महानसीयवह्न्यादेर्नानाधि-करणत्वाऽसम्भवेन नानाधिकरणसाध्यकहेतुपदेन वह्निसाध्यकधूमस्यासंग्रहेऽपि वह्निमत्पर्वतादिव्यक्तिभेदमादाय तत्राऽव्याप्तेर्वज्रलेपत्वात् इत्यतो नानाधिकरण-साध्यकपदेन तादृशधूमादिहेतोः संग्रहायाह टीकायां यत्रेति। यस्मिन् हेता-वित्यर्थः। तत्र = तस्मिन्हेतौ। निरुक्तधूमहेतावव्याप्तिसत्त्वे तस्यासंग्रहो दोषाये-त्याह तेनेति। निरुक्तार्थस्य विवक्षणेनेत्यर्थः।

वह्निसाध्यकेति। तथा च वह्नित्वावच्छिन्नाधिकरणस्य पर्वतादेर्नानात्वेन साध्यतावच्छेदकावच्छिन्नस्य नानाधिकरणसाध्यकहेतुपदेन वह्निसाध्यकधूमादेरपि संग्रहसम्भवात् तत्राव्याप्तिरिष्टैवेति भावः।

नानात्वं च स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेद-विशिष्टत्वं बोध्यं, तेन गगनादेर्व्यक्त्यन्तरमादाय नानात्वसम्भवेऽपि न क्षतिः। सर्वत्रेत्यत्र सर्वपदस्य सद्धेतुमात्रपरामर्शकत्वे शब्दवान् गगनत्वादित्यादावव्याप्त्य-भावेनाऽसंगतिः, केवलान्वयिसद्धेतुमात्रपरामर्शकत्वेऽपि वह्निमान् धूमादित्यादाव-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

धिकरणसाध्यके सर्वत्राव्याप्तिः। केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यव-

❀ जागदीशी ❀

सर्वत्र = केवलान्वयिनि तद्भिन्ने च। सार्वभौममतमुत्थापयति—केचित्त्विति। हेत्वधिकरण इति सप्तम्यर्थोवच्छेद्यत्वं तच्च साध्यवद्वृत्तित्वाभावेऽन्वितम्। तेनैवेति। हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थस्तस्य च साध्यवद्वृत्तित्वेन सहान्वयः। साध्यवत्त्वमपि येन सम्बन्धेन येन रूपेण साध्यता तत्सम्बन्धेन

❀ विवृतिः ❀

व्याप्तिसम्भवेनासंगतिः केवलान्वयिन्यव्याप्तिसम्भवेन केवलान्वयिभिन्ननानाधिकरणसाध्यकहेतुमात्रपरामर्शकत्वमपि तस्य न सम्भवत्येवातः तत्पदपरामर्शनीयं प्रदर्शयति केवलान्वयिनीति। वाच्यत्वादिसाध्यकज्ञेयत्वादिहेतावित्यर्थः। तद्भिन्ने = केवलान्वयिसद्धेतुभिन्ने नानाधिकरणसाध्यकहेतुमात्रे, तथा च सर्वशब्देन केवलान्वयिहेतोः नानाधिकरणसाध्यकहेतुमात्रस्य च परामर्श इत्याशय इतिदिक्।

सार्वभौममतसिद्धसाध्यासामान्याधिकरण्यपदार्थं प्रदर्श्य समुदितप्रथमलक्षणार्थमाह दीधितौ हेतुतावच्छेदकसम्बन्धेनेत्यादि। तथा च हेतुतावच्छेदकसम्बन्धेन यद्धेत्वधिकरणं तदवच्छेद्यस्तदवच्छिन्नो वा यः साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाधिकरणनिरूपितायाः हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितायाः अभावस्तदधिकरणभिन्नत्वं हेतौ व्याप्तिरिति समुदितलक्षणार्थः। संयोगेन धूमाधिकरणपर्वताद्यवच्छेद्यो यः संयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाधिकरणनिरूपितसंयोगावच्छिन्नवृत्तित्वस्याभावस्तदधिकरणघटादिव्यक्तिभिन्नत्वस्य धूमे सत्त्वाद् वह्निमान् धूमादित्यादौ लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तु संयोगेन वह्न्यधिकरणतप्तायःपिण्डावच्छेद्यस्य संयोगेन धूमाधिकरणपर्वतादिवृत्तित्वाभावस्याधिकरणतायाः वह्नौ सत्त्वेन तद्भिन्नत्वस्य तत्राऽसत्त्वान्नातिव्याप्तिरिति संक्षेपः।

टीकायां तस्य चेति। प्रकृत्यर्थविशेषितस्य तृतीयार्थावच्छिन्नत्वस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वस्य चेत्यर्थः। साध्यवद्वृत्तित्वेन = साध्याधिकरणनिरूपितवृत्तित्वेन। साध्यवत्त्वमपीति। साध्यवद्वृत्तित्वाभावघटकसाध्याधिकरणत्वमपीत्यर्थः। येनेत्यादि। तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

द्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे

❀ जागदीशी ❀

तद्रूपावच्छिन्नवत्त्वं बोध्यम्। तेन समवायेन वह्नेः साध्यत्वे धूमे विशिष्टसत्त्वसाध्यके सत्त्वादौ नातिव्याप्तिः। तदधिकरणभिन्नत्वमिति। तदत्यन्ता-

❀ विवृतिः ❀

साध्यतावच्छेदकधर्मावच्छिन्नं च यदाधेयत्वं तन्निरूपकाधिकरणत्वमेव साध्यवत्त्वं बोध्यमित्याशयः। यत्किंचित्सम्बन्धेन सम्बन्धसामान्येन वा साध्यवत्त्वप्रवेशेऽपि वह्निमान् धूमादित्यादौ नाव्याप्तिः, यत्किञ्चित्संयोगसम्बन्धेन संयोगाद्यन्यतमरूपसम्बन्धसामान्येन च वह्निमत्पर्वतादिसंयुक्तत्वाभावस्य धूमाधिकरणावच्छेद्यस्य धूमेऽसत्त्वात् अतोऽतिव्याप्तिवारणप्रयोजनकतया साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वप्रवेशं सार्थकयति तेनेति। साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वस्य प्रवेशे चेत्यर्थः। धूमे संयोगावच्छिन्नहेतुताश्रयीभूते व्यभिचारिणि धूमहेतौ। नातिव्याप्तिरिति परेणान्वयः। तथा च समवायसम्बन्धेन वह्निसाध्यकधूमहेतौ संयोगेन वह्न्यधिकरणत्वमादाय तन्निरूपितसंयोगावच्छिन्नवृत्तित्वाभावधूमाधिकरणपर्वताद्यवच्छेद्यस्य घटादिनिष्ठस्याधिकरणभिन्नत्वस्य धूमे सत्त्वाद्भवत्यतिव्याप्तिः यदि साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वप्रवेशो न स्यात्। साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वप्रवेशे तु समवायेन वह्न्यधिकरणे संयोगेन धूमस्यावर्त्तमानत्वादेव नातिव्याप्तिरिति भावः।

न च कालिकेन धूमाधिकरणायःपिण्डसंयुक्तत्वस्य वह्नौ सत्त्वाद् धूमवान् वह्नेरित्यत्रैवातिव्याप्तिसम्भवे स्थलान्तरानुसरणमनुचितमितिवाच्यम्, महाकालातिरिक्तस्य कालिकसम्बन्धेनाधिकरणत्वानभ्युपगमात् इति भावः।

इदमुपलक्षणं साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वाऽप्रवेशे महानसीयसंयोगसम्बन्धेन वह्निसाध्यकधूमहेतौ केवलसंयोगसम्बन्धेन वह्न्यधिकरणत्वमादायाप्यतिव्याप्तिरिति द्रष्टव्यम्। साध्यतावच्छेदकसम्बन्धेन साध्यनिष्ठाधेयताकाधिकरणत्वमात्रप्रवेशे दोषमाह विशिष्टेति। तथा च विशिष्टसत्तावान् सत्त्वादित्यत्र केवलसत्तानिष्ठाधेयताकाधिकरणसमवेतत्वाभावस्य सत्ताधिकरणगुणाद्यवच्छेद्यस्य जातित्वनिष्ठस्यानधिकरणतायाः सत्तायां सत्त्वाद् भवत्यतिव्याप्तिर्यदि साध्यतावच्छेदकरूपेण साध्यनिष्ठाधेयत्वप्रवेशो न स्यात्। तेन रूपेण तादृशाधेयतायाः प्रवेशे तु वैशिष्ट्यसत्तात्वावच्छिन्नाधेयताकाधिकरणद्रव्यवृत्तित्वाभावस्य गुणाद्यवच्छेदेन सत्तायां सत्त्वान्नातिव्याप्तिरित्याशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

भाववत्त्वोक्तौ द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। गुणाद्यवच्छेद्यद्रव्यवृत्तित्वाभावस्यैव द्रव्यावच्छेदेन सत्तायामभावसत्त्वादतो भिन्नत्वपर्यन्तानुसर-

❀ विवृतिः ❀

न च साध्यनिष्ठाधेयतामात्रविवक्षणे महानसीयवह्न्यधिकरणमहानससंयुक्तत्वाभावस्य धूमवत्पर्वताद्यवच्छेदेन धूमे सत्त्वाद् वह्निमान् धूमादित्यत्राव्याप्तिसम्भवे विशिष्टसत्तावान् सत्त्वादित्यत्रातिव्याप्तिदानमसंगतमिति वाच्यम्। साध्यतावच्छेदकेतरधर्मानवच्छिन्नसाध्यनिष्ठाधेयतायाः प्रवेशमभिप्रेत्यैवातिव्याप्तेरभिहितत्वात्।

न च तथापि विषयितया महानसीयवह्निसाध्यकतज्ज्ञानत्वहेतौ केवलवह्नित्वावच्छिन्नाधिकरणे वह्निज्ञाने तज्ज्ञानत्वस्यावर्तमानतयाऽव्याप्तिसंभवेऽतिव्याप्तिदानमनुचितमिति वाच्यम्। विषयित्वादिवृत्त्यनियामकसम्बन्धेनाधिकरणत्वादेरप्रसिद्ध्या तेन सम्बन्धेन व्याप्यव्यापकभावानभ्युपगमादिति तु विभावनीयम्। वस्तुतः साध्यतावच्छेदकसम्बन्धेन यत्किंचिन्निष्ठाधेयतायाः प्रवेशेऽव्याप्त्याद्यसम्भवेनातिव्याप्तेरभिहितत्वान्न कोऽपि दोष इति तु युक्तमुत्पश्यामः।

ननु हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणभिन्नत्वनिवेशे तादृशवृत्तित्वाभावाधिकरणतायाः प्रवेशेन गौरवात् लाघवात् हेत्वधिकरणाऽवच्छेद्यो यः साध्यवद्वृत्तित्वाभावस्तदभाववत्त्वमेव हेतौ व्याप्तिरस्तु, तावतापि वह्निमान् धूमादित्यादौ लक्षणसमन्वयः सम्भवत्येव, घटादिनिष्ठस्य धूमवत्पर्वताद्यवच्छेद्यवह्निमत्संयुक्तत्वाभावस्याभाववत्त्वस्य धूमे सत्त्वादित्याशंकते—तदत्यन्तेति। तस्य हेत्वधिकरणावछेद्यसाध्यवद्वृत्तित्वाभावस्य योऽत्यन्ताभावस्तद्वत्त्वस्य हेतुनिष्ठतया व्याप्तित्वोक्तावित्यर्थः। अतिव्याप्तिं संगमयति—गुणेति। सत्ताधिकरणगुणावच्छिन्नद्रव्यत्ववद्द्रव्यनिरूपितवृत्तित्वाभावस्यैवेत्यर्थः। भिन्नत्वपर्यन्तेति। हेत्वधिकरणावच्छिन्नसाध्यवद्वृत्तित्वाभावाभाववत्त्वस्य लक्षणार्थत्वे द्रव्यं सत्त्वादित्यत्रातिव्याप्तिः, अत्यन्ताभावस्याव्याप्यवृत्तितया सत्तारूपहेत्वधिकरणगुणावच्छिन्नस्य साध्यीभूतद्रव्यत्ववद्वृत्तित्वाभावस्याभाववत्त्वस्य द्रव्यावच्छेदेन सत्तायां सत्त्वादतस्तादृशवृत्तित्वाभावाधिकरणभिन्नत्वनिवेश इत्याशयः।

न च वह्निमदयोगोलकावच्छिन्नस्य धूमवद्वृत्तित्वाभावस्याभाववत्त्वस्यापि पर्वताद्यवच्छेदेन वह्नौ सत्त्वाद् धूमवान् वह्नेरित्यादिप्रसिद्धस्थले एवातिव्याप्तिसम्भवे द्रव्यं सत्त्वादित्यत्रातिव्याप्तिदानमनुचितमितिवाच्यम्, संयोगेन धूमसा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

णाम्। भेदस्तु नाव्याप्यवृत्तिः, तदव्याप्यवृत्तित्वे तु तादृशवृत्तित्वाभाववती यावती व्यक्तिस्तत्तद्भेदकूटवत्त्वं वक्तव्यमिति भावः॥ हेतुतावच्छेदक-

❀ विवृतिः ❀

ध्यकवह्नेरिव समवायेन द्रव्यत्वसाध्यकसत्ताहेतोरपि प्रसिद्धव्यभिचारिस्थलत्वेनैवोपादातुं शक्यत्वात्। द्रव्यं सत्त्वादित्यत्रादिपदेन धूमसाध्यकवह्निहेतोरप्युपग्रहसम्भवाच्च।

ननु हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणभिन्नत्वस्य व्याप्तित्वेऽपि द्रव्यं सत्त्वादित्यत्रातिव्याप्तिर्दुर्वारैव, हेत्वधिकरणगुणाद्यवच्छेद्यद्रव्यवृत्तित्वाभावाधिकरणताश्रयीभूतायामपि सत्तायां द्रव्यावच्छेदेन तादृशाधिकरणभिन्नत्वस्य सत्त्वादत आह—**भेदस्त्विति। नाव्याप्यवृत्तिरिति।** तथा च गुणावच्छिन्नद्रव्यवृत्तित्वाभावाधिकरणत्वस्य सत्तायां सत्त्वे तादृशाधिकरणत्वावच्छिन्नभेदस्तत्र न वर्तते एव, भेदतत्प्रतियोगितावच्छेदकयोरेकत्र विद्यमानतायाः नव्यैरनभ्युपगमादिति न तादृशाधिकरणभिन्नत्वविवक्षणे द्रव्यं सत्त्वादित्यत्रातिव्याप्तिरिति भावः।

ननु मूलावच्छिन्नो वृक्षो न कपिसंयोगीति प्रत्ययबलात् भेदोऽप्यव्याप्यवृत्तिरेवेत्यत आह **तदेति।** तस्य भेदसामान्यस्य हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणभेदस्यापि अव्याप्यवृत्तित्वे = भेदतत्प्रतियोगितावच्छेदकयोरवच्छेदकभेदेनैकत्र सत्त्वाभ्युपगमे इत्यर्थः। **तादृशेत्यादिः।** हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणताश्रयीभूता यावती व्यक्तिस्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवत्त्वं हेतौ व्याप्तिरिति समुदितार्थः। द्रव्यं सत्त्वादित्यादौ गुणावच्छेद्यद्रव्यवृत्तित्वाभावाधिकरणत्वस्य द्रव्यावच्छेदेन तादृशाधिकरणभेदस्य च सत्तायां सत्त्वेऽपि तादृशवृत्तित्वाभावाधिकरणीभूतसत्ताव्यक्तित्वावच्छिन्नभेदस्य सत्तायामसत्त्वान्नातिव्याप्तिरितिध्येयम्।

धूमवान् वह्नेरित्यादौ वह्न्यधिकरणायःपिण्डाद्यवच्छेदेन धूमवद्वृत्तित्वाभावाधिकरणीभूताऽऽलोकव्यक्तिभेदस्य वह्नौ सत्त्वादतिव्याप्तिरतो भेदकूटनिवेशनं, तथा च सति तादृशवृत्तित्वाभावाधिकरणयावद्व्यक्तिभेदकूटान्तर्गतवह्निव्यक्तिभेदस्य वह्नावसत्त्वान्नातिव्याप्तिः। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावइत्यत्र हेत्वधिकरणत्वं यदि सम्बन्धसामान्येन विवक्षितं स्यात्तदा वह्निमान् धूमादित्यादावव्याप्तिः, समवायेन धूमाधिकरणधूमावयवावच्छेद्यस्य वह्निमत्संयुक्तत्वाभावस्य धूमादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❋ दीधितिः ❋

संयोगेन वन्हिमति च समवायेनावृत्तावपि न क्षतिः। तादृशा-

❋ जागदीशी ❋

सम्बन्धेन हेत्वधिकरण इत्यस्य फलमाह—**स्वावयवे संयोगेनेति**। अवृत्तावपि न क्षतिरित्यन्वयः। तथा च तादृशसम्बन्धेन हेत्वधिकरणत्वाप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्संयुक्तत्वाभाववत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिः स्यान्न पुनरसम्भवः। इदं वाच्यं ज्ञेयत्वादित्यादावेव लक्षणसम्भवादिति भावः। अत्र चोत्पत्तिकालावच्छेदेन घटे पृथिवीत्वे रूपवद्वृत्तित्वं नेत्यादि प्रतीत्या घटाद्यवच्छेदेन पृथिवीत्वादौ रूपवद्वृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यम्।

❋ विवृतिः ❋

सत्त्वेन तदधिकरणभिन्नत्वस्य तत्रासत्त्वादित्याह—**हेतुतेत्याद्यव्याप्तिः स्यादित्यन्तेन**। दीधितिस्थ-**न क्षतिरि**त्यस्य नाव्याप्तिरित्यर्थं द्रढीकर्तुमाह **न पुनरिति**। कथन्तानिवृत्त्यर्थमाह **वाच्यं ज्ञेयत्वादिति**। तथा च सम्बन्धसामान्येन हेत्वधिकरणत्वविवक्षणेऽपि स्वरूपसम्बन्धेन कालिकसम्बन्धेन च ज्ञेयत्वाधिकरणतायाः प्रसिद्धतया तत्तत्सम्बन्धेन ज्ञेयत्वाधिकरणघटपटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वस्यैव ज्ञेयत्वहेतौ सत्त्वेन तादृशवृत्तित्वाभावाधिकरणपटत्वादिभिन्नत्वस्य तत्र सत्त्वात् वाच्यं ज्ञेयत्वादित्यादौ लक्षणसमन्वयसम्भवेन दीधितिस्थ-**न क्षतिरि**त्यस्य नाव्याप्तिरित्येवार्थः करणीय इति भावः।

नन्वेवं रूपवान् पृथिवीत्वादित्यत्राव्याप्तिः, पृथिवीत्वाधिकरणोत्पत्तिकालावच्छिन्नघटाद्यवच्छेद्यस्य रूपवद्वृत्तित्वाभावस्याधिकरणताया एव पृथिवीत्वे सत्त्वादित्याह **अत्र चोत्पत्तीति**। तथा चोक्तप्रतीत्यैव पृथिवीत्वे तादृशरूपवद्वृत्तित्वाभावः सेत्स्यतीतिभावः। उक्तप्रतीतिर्यदि वक्ष्यमाणयुक्त्या पृथिवीत्वनिष्ठरूपवद्वृत्तित्वस्यावच्छेदकत्वाभावमुत्पत्तिकालेऽवगाहते तदा न तत्राव्याप्तिरित्याह **रूपवद्वृत्तित्वाभावाभ्युपगमे इति**। कथंचित्तादृशवृत्तित्वाभावस्वीकारे इत्यर्थः। **निरवच्छिन्नं ग्राह्यमिति**। हेत्वधिकरणतातिरिक्तानवच्छिन्नं

❋ मनोरमा ❋

हेत्वधिकरणनिष्ठमवच्छेदकत्वं निरवच्छिन्नं ग्राह्यमिति। इदमुपलक्षणम्। साध्यवद्वृत्तित्वाभावनिष्ठमवच्छेद्यत्वमपि हेत्वधिकरणत्वावच्छिन्ननिष्ठावच्छेदकताभिन्नकालादिनिष्ठावच्छेदकत्वानिरूपकं ग्राह्यम्। तेनोत्पत्तिकालावच्छेदेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

तेन रूपवान् पृथिवीत्वादित्यादौ नाव्याप्तिः । तत्र घटनिष्ठावच्छेदकत्वस्योत्पत्तिकालेनावच्छेदादिति ध्येयम् । तेनैवेत्यस्य फलमाह—वह्निमति च समवायेनेति। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वानुक्तौ सम्बन्ध-

❀ विवृतिः ❀

ग्राह्यमित्यर्थः, तेन तादृशावच्छेदकताया हेत्वधिकरणत्वावच्छिन्नत्वेऽपि न क्षतिः । तथा च हेत्वधिकरणनिष्ठा या हेत्वधिकरणत्वातिरिक्तानवच्छिन्नावच्छेदकता तन्निरूपको यः साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वं व्याप्तिरितिभावः ।

तेनेति । हेत्वधिकरणनिष्ठावच्छेदकतायाः निरवच्छिन्नत्वेन विवक्षणेनेत्यर्थः । अव्याप्त्यभावे हेतुमाह **तत्रेति** । तादृशवृत्तित्वाभावे इत्यर्थः । घटकत्वं सप्तम्यर्थः । तस्य च घटनिष्ठावच्छेदकत्वेऽन्वयः । उत्पत्तिकालेनावच्छेदात् = उत्पत्तिकालावच्छिन्नत्वात् । तथा च निरवच्छिन्नपृथिवीत्वाधिकरणकेवलघटादिनिष्ठावच्छेदकताकरूपवद्वृत्तित्वाभावस्य पृथिवीत्वे विरहान्न रूपवान् पृथिवीत्वादित्यादावव्याप्तिरितिभावः । निरवच्छिन्नत्वं यदि कालानवच्छिन्नत्वं तदा मूलावच्छिन्नैतद्वृक्षावच्छेदेन कपिसंयोगवद्वृत्तित्वाभावस्यैतद्वृक्षत्वे सत्त्वात् कपिसंयोग्येतद्वृक्षत्वादित्यत्राव्याप्तिः । नापि हेत्वधिकरणत्वातिरिक्तानवच्छिन्नत्वं तत् , तादृशावच्छेदकताया हेतुनाप्यवच्छेदादिति निरवच्छिन्नत्वस्य दुर्वचतया वक्ष्यमाणरीत्या निरवच्छिन्नत्वाऽनिवेशेऽपि अव्याप्तेरसम्भवाच्च **ध्येयमित्युक्तम्** ।

तेनैवेत्यस्य फलमाह = हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वविवक्षायाः फलमाह । ननु हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्याप्रवेशे सम्बन्धसामान्येनैव साध्यवद्वृत्तित्वस्य विवक्षणीयतया न वह्निमान् धूमादित्यत्राव्याप्तिः धूमादौ सम्बन्धसामान्यावच्छिन्नवह्निमद्वृत्तित्वाभावस्यासत्त्वादित्यत आह— **हेतुतावच्छेदकसम्बन्धेनेत्यादिः** । सम्बन्धसामान्येन = संयोगसमवायाद्य-

❀ मनोरमा ❀

धूमादौ वह्निमत्संयुक्तत्वाभावसत्त्वेऽपि न वह्निमान् धूमादित्यादावव्याप्तिः ॥ न च रूपोपलक्षितोत्पत्तिकालावच्छिन्नघटनिरूपितवृत्तित्वाभावस्य तादृशघटावच्छेदेन पृथिवीत्वे विरहात् साध्योपलक्षितनिरूपितवृत्तित्वाभावविवक्षणेनैवोपपत्तौ हेत्वधिकरण-निष्ठावच्छेदकत्वस्य निरवच्छिन्नत्वेन विवक्षणमनतिप्रयोजनकमिति वाच्यम् । प्रतियोगिव्यधिकरणसाध्याभावाभाववत्त्वरूपस्योपलक्षितत्वस्य गुरुतया तन्निवेशासम्भवात्, वह्निमान् वह्निप्रागभावादित्यत्राव्याप्तेश्च । तत्सामग्रीनाश्ये तत्प्रागभावे तदधिकरणकालावच्छेदेन वह्न्युपलक्षितनिरूपितवृत्तित्वाभावस्याक्षतत्वादिति **ध्येयम्** ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

सामान्येन हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वसामान्याभावो न प्रवेश्यः। साधनाधिकरणावच्छेद्यताद्दशाभावस्याप्रसिद्धेः, किंतु यत्किंचित्सम्बन्धेन साध्यवद्वृत्तित्वाभावः प्रवेशनीयः। तथाच हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वन्हिमत्समवेतत्वाद्यभावसत्त्वादसंभव एव स्यात्। यदि तेनैव सम्बन्धेन साध्यवद्वृत्तित्वप्रवेशो न स्यादिति भावः। ननु हेत्वधिकरणावच्छेद्यत्वविशिष्टसाध्यवद्वृत्तित्वाभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसं-

❀ विवृतिः ❀

न्यतमसम्बन्धेन। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वान्वयि अवच्छिन्नत्वं तृतीयार्थः। न प्रवेश्य इत्यत्र हेतुमाह—**साधनेति**। हेत्वधिकरणावच्छेद्यो यः सम्बन्धसामान्यावच्छिन्नसाध्यवद्वृत्तित्वस्याभावः तस्येत्यर्थः।

अप्रसिद्धेरिति। घटपटादेरपि कालिकादिसम्बन्धेन वह्निमति पर्वते वर्त्तमानतया हेत्वधिकरणपर्वताद्यवच्छेद्यवह्निमत्सम्बन्धसामान्यावच्छिन्नवृत्तित्वाभावो न कुत्रापि प्रसिद्ध्यतीतिभावः। गगनादौ सम्बन्धसामान्यावच्छिन्नसाध्यवद्वृत्तित्वाभावस्य प्रसिद्धत्वाद्धेत्वधिकरणावच्छेद्य इत्युक्तं। तथा च गगनादौ ताद्दशवृत्तित्वाभावसत्त्वेऽपि तत्र हेत्वधिकरणावच्छेद्यत्वं न सम्भवति गगनादेरधिकरणाऽप्रसिद्ध्या, तन्निष्ठस्य ताद्दशवृत्तित्वाभावस्यावच्छेकतायाः हेत्वधिकरणेऽप्रसिद्धत्वात् तदधिकरणस्यैव तन्निष्ठधर्मावच्छेदकत्वनियमस्य वक्ष्यमाणत्वादित्याशयः।

भावमाह—**तथा चेति**। धूमाधिकरणपर्वताद्यवच्छेद्यस्य वह्न्यादिमन्निरूपितसमवायावच्छिन्नवृत्तित्वस्य योऽभावः तस्य धूमादौ सत्वेन तदधिकरणभिन्नत्वस्य धूमादावभावादिति तु परमार्थः। **असम्भव एव स्यादिति**। वाच्यं ज्ञेयत्वादित्यादावपि ज्ञेयत्वाधिकरणघटाद्यवच्छेदेन वाच्यत्ववत्समवेतत्वाभावस्य ज्ञेयत्वहेतौ सत्त्वेन लक्षणसमन्वयाऽसम्भवादसम्भव इति भावः। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वप्रवेशे तु धूमाधिकरणपर्वताद्यवच्छेदेन वह्न्यादिमत्संयुक्तत्वाभावस्य धूमे विरहान्नाऽसम्भव इत्याह **यदीत्यादिः**। **ताद्दशाभावस्येत्यादि**दीधितिग्रन्थोत्थितौ बीजं प्रदर्शयितुं शंकते **नन्विति**। केवलसाध्यवद्वृत्तित्वाभावस्याधिकरणस्य प्रसिद्धत्वादाह **हेत्वधिकरणेति**। धूमाद्यधिकरणावच्छिन्नत्वविशिष्टस्य वह्न्यादिमत्संयोगसम्बन्धाद्यवच्छिन्नवृत्तित्वाभावस्येत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

भावश्च सम्बन्धान्तरेण तत्रैव वर्तमाने सुलभः।

❀ जागदीशी ❀

भवि, तधिकरणस्यैव तन्निष्ठधर्मावच्छेदकतया गगनजलत्वादौ वह्निमत्पर्वत-संयुक्तत्वाभावस्य धूमवत्पर्वतानवच्छेद्यत्वादत आह—**तादृशाभावश्चेति**। हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावश्चेत्यर्थः। **सम्बन्धान्तरेण** = हेतु-तावच्छेदकसम्बन्धान्यसम्बन्धेन। **तथाच** हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाद्यभावस्याधिकरणत्वं पर्वतीयरूपादावेव प्रसिद्धमिति भावः।

❀ विवृतिः ❀

असम्भवीति। तादृशाभावस्याधिकरणाऽप्रसिद्ध्या तस्यानधिकरणत्वमप्य-प्रसिद्धमित्याशयः। तादृशाभावस्याधिकरणाप्रसिद्धौ हेतुमाह **तदधिकरणस्येति**। यत्र तादृशवृत्तित्वाद्यभावो वर्त्तते तस्य यदधिकरणं तस्यैवेत्यर्थः। **तन्निष्ठेति**। तादृशवस्तुनि वर्त्तमानस्य तादृशवृत्तित्वाद्यभावरूपधर्मस्यावच्छेदकतयेत्यर्थः। यत्र यो वर्त्तते तदधिकरणमेव तस्यावच्छेदकं भवतीति भावः। **गगनजलत्वादौ** = गगने जलत्वादौ च वर्त्तमानस्य। आदिना घटत्वादिपरिग्रहः। तादृशाभावस्य वृत्तिमन्निष्ठत्वेन विवक्षणे गगननिष्ठस्य तादृशवृत्तित्वाभावस्य धर्तुमशक्यत्वात् जलत्वादावित्युक्तं।

धूमवदिति। तथा च वह्निमान् धूमादित्यादौ सर्वत्राऽसम्भवः। गगने जलत्वादौ च वर्तमानो यो वह्निमन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावः तस्यावच्छेदकत्वं धूमाधिकरणपर्वतादावप्रसिद्धम्—गगनजलत्वादेरधिकरणस्यैव गगनजलत्वादिनिष्ठस्य तादृशवृत्तित्वाभावरूपधर्मस्यावच्छेदकतया गगनजलत्वादेर-धिकरणत्वस्य पर्वतादावसत्त्वात् गगनस्यावृत्तित्वात् जलत्वादेश्च जलादावेव वर्त्तमानत्वादिति हृदयम्।

दीधितौ तत्रैवेति। हेत्वधिकरणे एवेत्यर्थः। **वर्तमाने** = वृत्तित्ववति पदार्थे। 'सुलभ' इत्यस्य भावमाह टीकायां **तथाचेति**। **प्रसिद्धमिति**। गगनजलत्वादि-निष्ठस्य वह्निमत्संयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्यावच्छेदकताया गगनजल-त्वादेरनधिकरणे पर्वतादावसत्त्वेऽपि हेतुतावच्छेदकान्यसमवायसम्बन्धेन रूपाधि-करणतायाः धूमाधिकरणपर्वतादौ विद्यमानतया रूपनिष्ठस्य तादृशवृत्तित्वाभाव-रूपधर्मस्यावच्छेदकतायाः हेत्वधिकरणपर्वतादौ सत्त्वे बाधकाभावेन धूमाधिकरण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❁ जागदीशी ❁

यद्यपि रूपादौ वह्निमत्संयुक्तत्वाद्यभावस्य व्याप्यवृत्तित्वात् तत्र पर्वतादिकं नावच्छेदकं भावाभावयोरेकत्र वृत्त्यर्थमेवावच्छेदकत्वस्वीकारादित्यप्रसिद्धि-तादवस्थ्यम्। न च महानसादिसंयुक्ते कालिकादिसम्बन्धेन पर्वतादिनिष्ठ-घटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेद्यत्वप्रसिद्ध्या न दोष इति

❁ विवृतिः ❁

पर्वतावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणरूपादिभिन्नत्वस्य धूमादौ सत्त्वाल्लक्षण-समन्वय सम्भवान्नाऽसम्भव इति भावः।

नन्वेवमपि धूमाधिकरणपर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्तत्वाभावस्या-प्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिः। एकस्मिन् वस्तुनि वह्निमत्संयुक्तत्व-तदभावयोः समावेशार्थमेवावच्छेदकतायाः स्वीकरणीयतया पर्वतीयरूपादौ प्रसि-द्धस्यापि वह्निमत्संयुक्तत्वाभावस्यावच्छेदकत्वं धूमवत्पर्वतादावप्रसिद्धम् पर्वतीय-रूपादौ वह्निमत्संयुक्तत्वस्य कदाप्यसत्त्वेन तन्निष्ठस्य तादृशसंयुक्तत्वाभावस्य व्याप्यवृत्तित्वादित्याशंकते **यद्यपीति**।

रूपादाविति। आदिना पर्वतादिगतसंख्यापरिमाणादेरुपग्रहः। **व्याप्य-वृत्तित्वात्** = स्वाधिकरणवृत्त्यभावाऽप्रतियोगित्वात्। **तत्र** = तादृशसंयुक्तत्वाभावे। **भावाभावयोरिति**। कपिसंयोगतदभावयोरेकस्मिन् वृक्षे वर्त्तमानत्वरक्षार्थमेव मूलादेः कपिसंयोगाभावावच्छेदकतायाः यथा स्वीकारस्तथा रूपादौ वर्त्तमानस्य वह्निमत्संयुक्तत्वाभावस्यावच्छेदकत्वं धूमवत्पर्वतादेः स्वीकर्तुमशक्यमेव रूपादौ वह्निमत्संयुक्तत्वस्यावर्तमानत्वादिति भावः। तटस्थः शंकते **न चेति**। वाच्य-मिति परेणान्वयः। **महानसादीति**। अत्रादिना चत्वरादिपरिग्रहः। साध्यी-भूतवह्निमत्संयुक्तत्वरूपभावपदार्थस्य सत्त्वमाविष्कर्तुं घटादौ संयुक्तत्वविशेषणम्। हेतुतावच्छेदकान्यसम्बन्धेन पर्वतादौ घटाद्यधिकरणत्वमाविष्कर्तुं कालिकादि-सम्बन्धावच्छिन्नपर्वतानिष्ठत्वं घटादिविशेषणम्, घटादावित्यत्र आदिना पर्वतादि-संयुक्तरासभादेरुपग्रहः। अत एव पर्वतादि—इत्यत्रादिपदात् महानासादेःपरिग्रहः सम्भवति। कलिकादि इत्यत्रादिपदप्रयोजनं तु विभावनीयम्।

पर्वतावच्छेद्यत्वप्रसिद्ध्येति। एकस्मिन्नेव तादृशघटादौ महानसावच्छे-देन वह्निमत्संयुक्तत्वस्य पर्वताद्यवच्छेदेन च वह्निमत्संयुक्तत्वाभावस्य सत्त्वेन तादृशसंयुक्तत्वाभावस्याव्याप्यवृत्तितया पर्वतादौ तस्यावच्छेदकत्वप्रसिद्धौ बाध-काभाव इति भावः। **न दोष इति**। तथा च न वह्निमान् धूमादित्यादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वाच्यम् । इत्थमपि तद्रूपवान् तद्रसादित्यादौ तद्रसाधिकरणावच्छेदेन तद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्दुर्वारत्वात् । तथापि पर्वतावच्छेदेन तदीयरूपे न वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तिरवच्छेदकत्व-स्वीकारादित्थमभिधानं, साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधि-

---

हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तिभावाऽप्रसिद्ध्या अव्याप्तिः—हेतुतावच्छेदकान्य-कालिकसम्बन्धेन पर्वतादौ वर्तमाने महानससंयुक्ते घटे महानसावच्छेदेन वह्नि-मन्निरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वसत्त्वेऽपि धूमवत्पर्वतावच्छेदेन तादृश-वृत्तित्वाभावस्य तत्र प्रसिद्धतया तादृशवृत्तित्वाभावाधिकरणघटभिन्नत्वस्य धूम-रूपहेतौ सत्त्वादिति हृदयम् ।

समाधत्ते इत्थमपीति । निरुक्तरीत्या नानाधिकरणकसद्धेतावव्याप्तिवारणे-ऽपि रूपवान् पृथिवीत्वात्, सत्तावान् जातेरित्यादौ घटपटादिसमवेते कालिक-सम्बन्धेन मठादौ वर्त्तमाने द्वित्वे मठाद्यवच्छेदेन रूपादिमत्समवेतत्वाभाव-प्रसिद्ध्या अव्याप्त्यसम्भवेन एकमात्राधिकरणाभिन्नाधिकरणकहेतुमात्रेऽव्याप्ति-प्रदर्शनार्थमाह—**तद्रूपवान् तद्रसादित्यादाविति ।** आदिपदात् तद्वह्निमान् तद्धूमादित्यादेः परिग्रहः । अव्याप्तिमुपपादयति **तद्रसाधिकरणेति ।** तथा च तत्र तद्रूपवत्समवेतत्वतदभावयोः कुत्राप्यप्रसिद्ध्या घटत्वपटत्वादिनिष्ठस्य तद्रूपवत्समवेतत्वाद्यभावस्य व्याप्यवृत्तितया तद्रसाधिकरणावच्छेद्यतद्रूपवत्-समवेतत्वाभावाऽप्रसिद्ध्याऽव्याप्तेरितिभावः ।

यद्यपीत्यादेरुत्तरं—**तथापीति ।** तदीयरूपे = पर्वतीयरूपे । व्याप्यवृत्तेः = निरुक्तवह्निमत्संयुक्तत्वाभावादिरूपव्याप्यवृत्तिपदार्थस्य । तथा च धूमवत्-पर्वतावच्छेद्यवह्न्यधिकरणनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य पर्वती-यरूपनिष्ठतया प्रसिद्धिसम्भवात् न वह्निमान् धूमादित्यादावव्याप्तिः, न वा तद्रूपवान् तद्रसादित्यत्राव्याप्तिः, तत्रापि—तद्रसाधिकरणतद्व्यक्त्यवच्छेदेन कालिकादिना वर्त्तमाने तद्रसाधिकरणे घटत्वादौ न तद्रूपवत्समवेतत्वमित्यादि-प्रतीत्या तद्रसाधिकरणावच्छेद्यतद्रूपवत्समवेतत्वाभावस्य प्रसिद्धत्वादित्याशयः । इत्थमभिधानं = तादृशाभावश्चेत्याद्यभिधानम् ।

व्याप्यवृत्तेरवच्छेदकत्वमनभ्युपगच्छतां मते तादृशप्रतीतेरप्रामाणिकतया तन्मतेऽप्युपपत्तिमाह—**साध्येति ।** साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यता-वच्छेदकावच्छिन्नाधेयतानिरूपकाधिकरणनिरूपितस्य हेतुतावच्छेदकसम्बन्धावच्छि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

करणं हेत्वधिकरणं तदन्यत्वे वा ग्रन्थतात्पर्यम् । तथा च व्याप्यवृत्तेरवच्छेदकत्वासत्त्वेपि साध्यवद्वृत्तित्वाभावविशिष्टस्य तस्याधिकरणत्वमादायैव लक्षणसंगतिः । न च वस्तुगत्या साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वोक्तौ वन्हिमान्धूमादित्यादावव्याप्तिः । स्वावयवावच्छेदेन वन्हिमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात्, साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वम् हेतुमतस्तदन्यत्वोक्तौ तु

त्ववृत्तित्वस्याभावविशिष्टायाः यद्यद्व्यक्तेः हेतुतावच्छेदकान्यहेतुतावच्छेदकान्यतरसम्बन्धेनाधिकरणं हेत्वधिकरणं तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवत्त्वं हेतौ व्याप्तिरितिसमुदितार्थः । तेन न धूमवत्संयुक्तत्वाभावविशिष्टायाः अयोगोलकीयरूपव्यक्तेः समवायेनाधिकरणतायाः अयोगोलके वर्त्तमानतया तादृशरूपव्यक्तिभेदमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिः, तादृशभेदकूटान्तर्गतस्य वह्निव्यक्तिभेदस्य वह्नौ असत्त्वात् । ग्रन्थतात्पर्यं = तादृशाभावश्चेत्यादिग्रन्थतात्पर्य्यम् । वह्निमान् धूमात् तद्रूपवान् तद्रसादित्यादौ तु वह्निमत्संयुक्तत्वाभावविशिष्टस्य समवायेन पर्वताद्यधिकरणकरूपादेस्तद्रूपवत्समवेतत्वाभावविशिष्टस्य कालिकादिना तद्रसाधिकरणाधिकरणकघटत्वादेर्भिन्नत्वस्य तत्र तत्र हेतौ सत्त्वात् ।

व्याप्यवृत्तेरवच्छेदकत्वाऽनङ्गीकारेऽपि लक्षणसमन्वयः सम्भवतीत्याह—तथा चेति । तस्य = पर्वतीयरूपादेः । ननु हेत्वधिकरणावच्छेद्यत्वस्य साध्यवद्वृत्तित्वाभावविशेषणत्वमुपेक्ष्य निरुक्तरीत्या लक्षणार्थनिर्वचने वह्निमान् धूमादित्यादावव्याप्तिः, धूमावयवावच्छेदेन वह्निमत्संयुक्तत्वाभावविशिष्टस्य धूमस्याधिकरणतायाः हेत्वधिकरणे पर्वतादौ सत्त्वेन तादृशवृत्तित्वाभावविशिष्टयत्पदेन धूमस्य धर्तुं शक्यतया तदन्यत्वस्य धूमे विरहादित्याशङ्कते—न चेति । वाच्यमिति परेणान्वयः ।

वस्तुगत्येति । हेत्वधिकरणावच्छेद्यत्वविशेषणपरित्यागेनेतिभावः । स्वावयवावच्छेदेन = धूमावयवावच्छेदेन । साधनवत्पर्वतादौ = धूमाधिकरणपर्वतादौ । उक्ताव्याप्तिं वारयितुं शंकते—**साध्यवद्वृत्तित्वेति** । साध्यवद्वृत्तित्वाभाववैशिष्ट्ययद्व्यक्तित्वरूपधर्मद्वयाद्यवच्छिन्ननिरूपकताकाऽधिकरणत्वमित्यर्थः । हेतुमतः = हेत्वधिकरणस्य । तदन्यत्वोक्तौ = तादृशतद्व्यक्तित्वावच्छिन्नभिन्नत्वस्य व्याप्तिपदार्थत्वोक्तौ । तथा च धूमावयवावच्छिन्नत्वविशिष्टवह्निमत्संयुक्तत्वाभावविशिष्टधूम-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वन्हिमान् धूमादिदं वाच्यं ज्ञेयत्वादित्यादौ सर्वत्रासंभवः साध्यवद्-संयुक्तत्वादिविशिष्टतत्तद्रूपादिव्यक्तित्वस्य गुरुतया तदवच्छिन्नाधिकरण-त्वाप्रसिद्धेः केवलस्यातिप्रसंग एव विशिष्टधर्मस्याधिकरणतानिरूप-कतावच्छेदकत्वकल्पनादिति वाच्यम्। सार्वभौमानां मते प्रतियोगिताया

❀ विवृतिः ❀

व्यक्तित्वावच्छिन्नाधिकरणत्वस्य विलक्षणतया तस्य धूमावयवातिरिक्ते हेत्वधिक-रणपर्वतादावसत्त्वेन यत्पदेन धूमस्योपादानासम्भवात् न वह्निमान् धूमादि-त्यत्राव्याप्तिरिति हृदयम्।

असम्भवमुपपादयति—**साध्यवदेति**। धूमावयवाद्यवच्छिन्नवह्निमत्संयुक्त-त्वाभावविशिष्टधूमादिव्यक्तित्वस्य वाच्यत्ववत्स्वरूपसम्बन्धावच्छिन्नवृत्तित्वा-भावविशिष्टघटादिव्यक्तित्वस्य चेत्यर्थः। **गुरुतयेति**। केवलधूमादिव्यक्तित्वा-पेक्षयेत्यादिः। **तदवच्छिन्नेति**। धूमावयवाद्यवच्छिन्नवह्निमत्संयुक्तत्वभाव-विशिष्टधूमादिव्यक्तित्वावच्छिन्ननिरूपकताकाधिकरणत्वाऽप्रसिद्धेरित्यर्थः। गुरुधर्म-स्य निरूपकतानवच्छेदकत्वे हेतुमाह—**केवलस्येति**। तादृशवृत्तित्वाभावोपल-क्षितधूमादिरूपयद्व्यक्तित्वमात्रस्येत्यर्थः। अतिप्रसंग एव = किञ्चिन्निष्ठाधिकर-णतानिरूपितनिरूपकत्वाऽव्यापकत्वे एव। विशिष्टधर्मस्य = साध्यवद्वृत्तित्वाभाव-विशिष्टधूमादिव्यक्तित्वस्य। **अधिकरणतेति**। किञ्चिन्निष्ठाधिकरणतानिरूपित-निरूपकतावच्छेदकत्वस्य स्वीकारादित्यर्थः। तथा च सर्वत्रैव सद्धेतौ साध्यवद्वृत्ति-त्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वाऽप्रसिद्ध्या असम्भव इत्यभिमानः।

अभिमानं निराकरोति—**सार्वभौमानामिति**। अयमाशयः—यथा कम्बु-ग्रीवादिमान्नास्तीत्यादिप्रतीतिबलात् घटत्वापेक्षया गुरुधर्मस्यापि कम्बुग्रीवादि-मत्त्वादेरभावप्रतियोगितावच्छेदकत्वं सार्वभौमसम्मतं तथा धूमावयवावच्छिन्नवह्नि-मत्संयुक्तत्वाभावविशिष्टधूमादिव्यक्तिमानित्यादि—प्रतीत्या तादृशधूमादिव्यक्ति-त्वस्य केवलधूमादिव्यक्तित्वापेक्षया गुरुत्वेऽपि अधिकरणतानिरूपितनिरूपकताव-वच्छेदकत्वमवश्यमभ्युपगन्तव्यम्। एवं च वह्निमान् धूमादित्यादौ धूमा-वयवावच्छिन्नवह्निमत्संयुक्तत्वाभावविशिष्टधूमादिव्यक्तित्वावच्छिन्नाधिकरणतायाः विलक्षणतया हेत्वधिकरणपर्वतादावसत्त्वेन यद्व्यक्तिपदेन धूमस्योपादानाऽसम्भ-वात्; वह्निमत्संयुक्तत्वाभावविशिष्टपर्वतीयरूपादिव्यक्तिमादाय तद्रूपव्यक्तिभिन्नत्व-स्य धूमादौ सुघटतया सर्वत्रैवानया रीत्या लक्षणसमन्वयसम्भवान्नाऽसम्भव इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

इवाधिकरणताया अपि गुरुधर्मावच्छेद्यत्वोपगमात्। अन्यथा समवेतत्वमपेक्ष्य सत्तावत्समवेतत्वस्य गुरुतया साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान्द्रव्यत्वादित्यादावव्याप्तिप्रसंगात्। ननु साध्यसामानाधिकरण्यवतो न तदभाववत्त्वमतो द्रव्यं सत्त्वा-

❀ विवृतिः ❀

ननु सार्वभौममते गुरुधर्मस्य प्रतियोगितावच्छेदकताया एव युक्तिसहत्वे प्रमाणाभावात् प्रतियोगिताया इवेत्यसिद्धमित्यत आहान्यथेति। गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे इत्यर्थः। समवेतत्वापेक्षया = केवलसमवायावच्छिन्नवृत्तित्वत्वापेक्षया—**सत्तावदिति**। सत्ताधिकरणनिरूपितत्वविशिष्टवृत्तित्वत्वस्येत्यर्थः। **अप्रसिद्ध्येति**। न च साध्यवद्वृत्तित्वनिष्ठप्रतियोगिताकाभावविवक्षणे नेयमनुपपत्तिरिति वाच्यम्। तथा सति गुणवृत्तित्वविशिष्टसत्तावत्समवेतत्वाभावस्य सत्तावत्समवेतत्वगुणत्वोभयाभावस्य च द्रव्यत्वनिष्ठतया सत्तावान् द्रव्यत्वादित्यादौ सर्वत्राऽसम्भवापत्तेः।

अव्याप्तिप्रसंगादिति। तथा च साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्यैवावश्यं लक्षणघटकतया सत्तारूपसाध्यवत्समवेतत्वस्य गुरुतया तदवच्छिन्नाभावाऽप्रसिद्ध्या सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरतः सत्तावत्समवेतत्वत्वावच्छिन्नप्रतियोगिताकाभावमादाय लक्षणसमन्वयार्थं गुरुधर्मस्य प्रतियोगितावच्छेदकतायाः सार्वभौममतसिद्धत्वे तद्दृष्टान्तबलेन दार्ष्टान्तिकेऽपि गुरुधर्मेऽधिकरणतानिरूपितनिरूपकतावच्छेदकतायाः तन्मतसिद्धत्वे बाधकाऽभावेन सर्वत्र साध्यवद्वृत्तित्वाभावविशिष्टयद्व्यक्तित्वावच्छिन्नाधिकरणत्वमादायैव लक्षणसमन्वयः करणीय इतिभावः। हेत्वधिकरणावच्छेदेनेति विशेषणं सार्थकीकर्तुं दीधतिग्रन्थमवतारयति **नन्विति**। सामानाधिकरण्यवतः = तदधिकरणनिरूपितवृत्तित्ववतः। न तदभाववत्त्वं = न तदधिकरणनिरूपितवृत्तित्वाभाववत्त्वम्।

अत इति। तथा चेत्यर्थः। **यद्वा** यतः सामानाधिकरण्यवतो न तदभाववत्त्वमतः कारणादित्यर्थः। व्यभिचारिणि = व्यभिचारिमात्रे। **अतिव्याप्तिरिति**। तथा च हेत्वधिकरणावच्छेदेनेत्यनुक्तौ द्रव्यं सत्त्वादित्यादौ सर्वत्र व्यभिचारिण्यतिव्याप्तिः। द्रव्यत्वादिमन्निरूपितसमवायावच्छिन्नवृत्तित्वस्यैव सत्तायां विद्यमानतया तदभावस्य तत्राऽसत्त्वेन तादृशवृत्तित्वाभावाधिकरणगुणत्वभिन्नत्वस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वम् ।

सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् ।

❀ जागदीशी ❀

दित्यादौ व्यभिचारिण्यतिप्रसंग इत्यत आह—**व्यभिचारिणस्त्वति**। तादृशीति–हेतुताघटकसम्बन्धेन हेतुमतीत्यर्थः। तादृशाभाववत्त्वं साध्यवद्वृत्तित्वाभाववत्त्वं। अत्रैवानुभवं प्रमाणयति—**सत्तायामित्यादि** । एवं सत्तायामपि द्रव्यत्वसामानाधिकरण्यविरहे। **विशिष्टसत्त्वइति**। विशि-

❀ विवृतिः ❀

सत्तारूपहेतौ सत्त्वादतः हेत्वधिकरणावच्छेदेनेत्युक्तं तथा च न व्यभिचारिण्यतिव्याप्तिः। द्रव्यत्ववद्वृत्तित्वस्य सत्तायां सत्त्वेऽपि तदभावस्य गुणावच्छेदेन सत्तायां वर्त्तमानतया हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणतायाः एव सत्तायां सत्त्वादिति भावः।

व्यभिचारिणस्त्वतीति। तादृशाभाववत्त्वमिति परेणान्वयः। हेतुमतीत्यत्र सप्तम्यर्थोऽवच्छेद्यत्वं, अस्य च साध्यवद्वृत्तित्वाभावेन सहान्वयः। तथा च व्यभिचारनिरूपकाधिकरणीभूतहेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववत्त्वं व्यभिचारिणो हेतोरित्येवं समुदितदीधितिग्रन्थतात्पर्य्यमित्याशयः। अत्रैव = गुणावच्छेदेन सत्तायां द्रव्यत्ववद्वृत्तित्वाभावसत्त्वे एव। **प्रमाणयतीति**। तथा चोक्तप्रतीतिरेव गुणावच्छेद्यद्रव्यत्ववद्वृत्तित्वाभावं सत्तायामवगाहते इति भावः। नन्वेवं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राव्याप्तिः, विशिष्टसत्त्वस्य केवलसत्त्वाऽनतिरिक्ततया सत्तारूपहेत्वधिकरणगुणाद्यवच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य विशिष्टसत्तायां सत्त्वादित्याशंकते—

—दीधितौ **न चैवमिति**। अव्याप्तिरिति परेणान्वयः। समाधत्ते **विशिष्टस्यातिरिक्तत्वात् इति**। विशेषणविशेष्याभ्यामतिरिक्तत्वादित्यर्थः। तथा च विशिष्टसत्त्वस्य केवलसत्तातो भिन्नतया विशिष्टसत्ताधिकरणं द्रव्यमेव न तु गुणः एवं च तादृशद्रव्यावच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य विशिष्टसत्तायामसत्त्वान्नाव्याप्तिरिति हृदयम्। निरुक्तशंकाघटकैवंकारार्थं व्याचष्टे **सत्तायामपीति**। द्रव्यत्वसाध्यकसत्तारूपहेतावपीत्यर्थः। **द्रव्यत्वेति**। गुणावच्छिन्नद्रव्यत्ववद्वृत्तित्वाभावसत्त्वे इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः । विशिष्टस्यातिरिक्त-त्वात् ।

❀ जागदीशी ❀

ष्टसत्त्वशब्दबोध्यहेतावित्यर्थः । यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्तायां सत्ताव्यक्तावव्याप्त्याशंकायामुत्तरग्रन्थेन तदनिरासादसंगत्यापत्तेः । अति-रिक्तत्वादिति । तथा च गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः ।

❀ विवृतिः ❀

ननु विशिष्टसत्तायामव्याप्तिरिति ग्रन्थेन यथाश्रुते विशिष्टसत्ताव्यक्तावेवा-व्याप्तेराशंकिततया विशिष्टस्यातिरिक्तत्वादित्याद्युत्तरग्रन्थेन तादृशाव्याप्तिवारणम-संभवि । नहि 'भवति नीलघटो घटान्य' इत्यस्य स्वयमुक्ततया विशिष्टसत्ताव्यक्तौ सत्ताव्यक्तिभिन्नत्वस्याप्रामाणिकतया गुणादेर्विशिष्टसत्तारूपसत्ताव्यक्तेः अधिक-रणतायाः निर्विवादादित्यत आह—विशिष्टसत्त्वशब्देति । विशिष्टसत्तारूप-वाक्यप्रतिपाद्यविशिष्टसत्तारूपहेतावित्यर्थः । तथा च विशिष्टसत्त्वशब्दबोध्यस्य वाक्यार्थतया सत्ताशब्देन विशिष्टांशस्याबोधात् सत्ताशब्दबोध्यातिरिक्ततायाः सर्ववादिसिद्धतया 'विशिष्टस्यातिरिक्तत्वादि'त्युत्तरग्रन्थस्यापि निरुक्तार्थकरणेन गुणादेर्विशिष्टसत्ताबोध्यस्य सत्ताशब्दबोध्याऽभिन्नस्याधिकरणत्वविरहेण न द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिरिति भावः । यथाश्रुते = शक्तिभ्रमाद्यजन्यशाब्दबोधे जननीये । विशिष्टसत्ताव्यक्तेः सत्ताव्यक्तितोऽभिन्नत्वसूचनाय सत्ताव्यक्ता-वित्युक्तम् ।

उत्तरग्रन्थेन=विशिष्टस्यातिरिक्तत्वादिति ग्रन्थेन । विशिष्टव्यक्तेः शुद्धव्यक्त्य-भिन्नतयेत्याशयः । तदनिरासात् = अव्याप्त्यनिरासात् । विशिष्टसत्ताव्यक्त्यभिन्न-सत्ताव्यक्त्यधिकरणतायाः गुणे सत्त्वादितिभावः । असंगत्यापत्तेरिति । तथा च 'विशिष्टस्यातिरिक्तत्वादि'ति ग्रन्थस्य विशिष्टसत्ताशब्दबोध्यस्य सत्ताशब्द-बोध्यभिन्नत्वादित्येवमर्थकरणीय इति भावः । विशिष्टस्यातिरिक्तत्वादिति ग्रन्थेना-व्याप्तिं वारयति तथा चेति । ननु उत्तरग्रन्थेन हेतुताश्रयाधिकरणावच्छे-देन साध्यवद्वृत्तित्वाभावस्यैव विवक्षणीयतया स्पर्शवान् भूतत्वमूर्तत्वोभयस्मा-दित्यत्राव्याप्तिः, हेतुताश्रयमूर्तत्वाधिकरणमनोऽवच्छेदेन स्पर्शवद्वृत्तित्वाभावस्य भूतत्वमूर्तत्वोभयस्मिन् वर्तमानतया तादृशोभयभिन्नत्वस्य हेतावसत्त्वादित्यत आह

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

उभयत्वमपि नैकविशिष्टापरत्वमेव, तच्चातिरिक्तमेव, नातः स्पर्शवान् मूर्तत्वभूतत्वोभयस्मादित्यादावव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावपि विशिष्टसत्तादिहेतौ नाव्याप्तिः। न च धूमाधिकरणमहानसावच्छेदेन पर्वतीयधूमे वन्हिमत्संयुक्तत्वाभावस्य चालनीन्यायेन सत्त्वादव्याप्तिः। महानसादेरपि कालि-

❀ विवृतिः ❀

उभयत्वमपीति। समानाधिकरणमुभयत्वमपीत्यर्थः। एकविशिष्टापरत्वमेव = भूतत्वविशिष्टमूर्तत्वत्वमेव। एवकारेण तस्य विशिष्टत्वादतिरिक्तत्वव्यवच्छेदः।

ननु तथापि भूतत्वविशिष्टमूर्तत्वत्वरूपहेतुताश्रयीभूतस्य मूर्तत्वस्याधिकरणतायाः मनसि सत्त्वेनाव्याप्तिः स्यादेवेत्यत आह **तच्चेति**। भूतत्वविशिष्टमूर्तत्वत्वाश्रयीभूतं चेत्यर्थः। अतिरिक्तं = केवलमूर्तत्वतो भिन्नम्। इत्थं च भूतत्वविशिष्टमूर्तत्वरूपभूतत्वमूर्तत्वोभयाधिकरणं पृथिव्यादिचतुष्टयमेव तदवच्छेदेन च स्पर्शवद्वृत्तित्वाभावस्य च निरुक्तभूतत्वमूर्तत्वोभयहेतौ विरहात्—न स्पर्शवान् भूतत्वमूर्तत्वोभयस्मादित्यत्राव्याप्तिरित्याह **नात इति**।

ननु विशिष्टस्यातिरिक्तत्वमभ्युपगम्याव्याप्तिवारणमसंगतम्, विशिष्टस्यानतिरिक्तत्वेऽपि हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावविवक्षणेनैव सहजतोऽव्याप्तिवारणसम्भवात् वैशिष्ट्यसत्तात्वावच्छिन्नाधिकरणद्रव्यावच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य विशिष्टसत्तारूपहेतावसत्त्वादित्याशंकते—**यद्यपीति**। हेतुतावच्छेदकावच्छिन्नाधिकरणावच्छेद्यत्वमनुक्त्वा हेत्वधिकरणावच्छेद्यत्वमात्रनिवेशे पर्वतीयधूमाधिकरणपर्वतावच्छेद्यत्वविशिष्टवह्निमत्संयुक्तत्वाभावाधिकरणधूमान्तरादिभिन्नत्वस्य पर्वतीयधूमे महानसीयधूमाधिकरणमहानसावच्छेद्यत्वविशिष्टवह्निमत्संयुक्तत्वाभावाधिकरणधूमान्तरादिभिन्नत्वस्य च महानसीयधूमे सत्त्वेन प्रत्येकधूमस्यैव वह्निव्याप्यतया तत्तद्धूमादिकमादायैव वह्निसाध्यकधूमे लक्षणसमन्वयः सम्भवति, हेतुतावच्छेदकावच्छिन्नाधिकरणावच्छेद्यत्वप्रवेशे तु वह्निमान् धूमादित्यत्राव्याप्तिः, हेतुतावच्छेदकावच्छिन्नाधिकरणपदेन पर्वतीयत्वाद्यविशेषितधूमत्वावच्छिन्नाधिकरणस्यैव धर्तव्यतया तादृशधूमाधिकरणपर्वतावच्छेदेन वह्निमत्संयुक्तत्वाभावस्य महानसीयधूमे तादृशधूमाधिकरणमहानसावच्छेदेन वह्निमत्संयुक्तत्वाऽभावस्य पर्वतीयधूमे वर्त्तमानतया निरुक्तरीत्या सर्वस्यैव धूमादेः वह्निमत्संयुक्तत्वाभावाधिकरणत्वेन कुत्रापि धूमे तादृशाभावाधिकरणभिन्नत्वस्य विरहादित्याशंकते **न चेति**। न चैवमित्यर्थः। एवं =

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

कादिसम्बन्धेन पर्वतीयधूमाधिकरणत्वात् तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम्। स्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभाववद्वृत्तिधर्मवत्त्वमित्यस्यैव फलितार्थस्य तद्धूमत्वधर्ममादायैव धूमादौ लक्षणसम्भवेन धूमत्वस्य हेतुतानवच्छेदकत्वेपि क्षत्यभावात्, तथापि विशि-

❀ विवृतिः ❀

हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वविवक्षणे। चालनीयन्यायेनेत्युक्त्वा सर्वस्यैव धूमादेस्तादृशसंयुक्तत्वाभावाधिकरणत्वं सूचितम्।

ननु महानसादेः पर्वतीयधूमाद्यनधिकरणतया पर्वतीयधूमवृत्तिवह्निमत्संयुक्तत्वाभावस्यावच्छेदकत्वमेव महानसादेर्न सम्भवति, तदधिकरणस्यैव तद्वृत्तिधर्मावच्छेदकत्वनियमात् अत आह **महानसादेरपीति**। साध्यवद्वृत्तित्वाभाववत्तायां = वह्निमत्संयुक्तत्वाभावे। **अवच्छेदकत्वादिति**। तथा च हेतुतावच्छेदकसंयोगभिन्नकालिकसम्बन्धेन पर्वतीयधूमाधिकरणतायाः महानसादौ सत्त्वेन महानसादेः पर्वतीयधूमे वर्त्तमानस्य वह्निमत्संयुक्तत्वाभावरूपधर्मस्यावच्छेदकत्वं सुघटमिति भावः।

न चेत्यादेः समाधानमाह **स्वावच्छिन्नेति**। स्वं—पर्वतीयधूमत्वादिकम्। तथा च तादृशस्वावच्छिन्नाधिकरणावच्छेद्यो यः साध्यवद्वृत्तित्वाभावस्तदधिकरणनिरूपितवृत्तित्वाभाववत् यत् स्वं तद्वत्त्वं लक्षणार्थः। एवञ्च न वह्निमान् धूमादित्यादौ अव्याप्तिः, पर्वतीयधूमत्वावच्छिन्नाधिकरणपर्वतावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणमहानसीयधूमादाववर्तमानपर्वतीयधूमत्ववत्त्वस्य पर्वतीयधूमे, महानसीयधूमत्वावच्छिन्नाधिकरणावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणपर्वतीयधूमादाववर्तमानमहानसीयधूमत्ववत्त्वस्य महानसीयधूमे, सत्त्वेन निरुक्तरीत्या सर्वस्मिन्नेव धूमादौ लक्षणसमन्वयसम्भवात्।

नन्वेवं धूमत्वं व्याप्यतावच्छेदकं न स्यादेवेत्याह **धूमत्वस्येति**। **क्षत्यभावादिति**। तत्तद्धूमत्वमादाय लक्षणसमन्वयसम्भवेनेत्यादिः। तथा च तत्तद्धूमत्वमेव वह्निमान् धूमादित्यादौ हेतुतावच्छेदकमितिभावः।

❀ मनोरमा ❀

स्वावच्छिन्नाधिकरणावच्छेद्येति। स्वतादात्म्यस्वावच्छिन्नाधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणवृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वोभयसम्बन्धेन धर्म्मविशिष्टधर्म्मवत्त्वमिति तु तात्पर्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

ष्टस्यातिरिक्तत्वात्तत एवाव्याप्तिवारणसम्भवे हेतुतावच्छेदकावच्छिन्नाधिकरणत्वप्रवेशे गौरवमसम्भवो वा विशिष्टनिरूपिताऽधिकरणत्वाप्रसिद्धेः। एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वे ताद्रूप्येण कथायां हेतोरुपन्यासो न स्यादित्याशयः। ननु विशिष्टसत्त्वस्यातिरिक्तत्वे मानाभावः। न च गुणो

❀ विवृतिः ❀

यद्यपीत्यादेरुत्तरं—**तथापीति**। **गौरवादिति**। पर्य्याप्त्यादिनिवेशादिति भावः। उभयत्र गौरवे विप्रतिपन्नं प्रत्याह—**असम्भवो वेति**। न लक्षणस्य सम्भवः असम्भव इति व्युत्पत्त्या द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिर्वेत्यर्थः। तेन तत्तद्धूमत्वरूपहेतुतावच्छेदकधर्ममादाय वह्निमान् धूमादित्यादौ लक्षणसमन्वयसम्भवात् यथाश्रुतस्यासंगतत्वेऽपि न क्षतिरित्यवधेयम्। **विशिष्टेति**। वैशिष्ट्यसत्तात्वावच्छिन्ननिरूपकताकाधिकरणत्वस्याप्रसिद्धेरित्यर्थः तथा च घटत्वादिविशिष्टसत्तात्वाद्यवच्छिन्नाधिकरणताव्यक्तिभिः क्लृप्ताभिरेवोपपत्तौ गुणकर्मान्यत्वविशिष्टसत्तात्त्वावच्छिन्नाधिकरणत्वाऽप्रसिद्ध्या द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिरिति भावः।

केचित्तु हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेद्यत्वविशिष्टसाध्यवद्वृत्तित्वाभावत्वस्य हेत्वधिकरणावछेद्यत्वविशिष्टसाध्यवद्वृत्तित्वाभावत्वापेक्षया गुरुतया तदवच्छिन्नाधिकरणत्वस्याऽप्रसिद्ध्या सर्वत्राऽसम्भव इति यथाश्रुतमेव सम्यग् इत्याहुस्तच्चिन्त्यम्। ननु द्रव्यं गुणकर्मान्यत्वविशिष्टसत्तावदित्यनुगतप्रतीत्यनुरोधेन विशिष्टसत्तात्त्वावच्छिन्नाधिकरणत्वमवश्यमभ्युपगन्तव्यमिति न द्रव्यं विशिष्टसत्त्वादिव्यत्राव्याप्तिरत आह—**एवमिति**। ताद्रूप्येण = धूमत्वरूपेण। कथायां = परार्थानुमानप्रयोजकप्रतिज्ञादिपञ्चवाक्यात्मकन्यायप्रयोगदशायाम्। हेतोः = धूमस्य। **न स्यादिति**। तथा च पूर्वोक्तयुक्त्याऽव्याप्तिभयेन वह्निमान् धूमादित्यादौ धूमत्वं न हेतुतावच्छेदकमङ्गीकर्त्तव्यम् अपि तु तत्तद्धूमत्वमेव। एवञ्च न्यायप्रयोगस्थले पर्वतो वह्निमान् इत्याकारकप्रतिज्ञावाक्यानन्तरं धूमादित्युक्त्वा तद्धूमादित्येवं हेतुप्रयोगं कुर्य्यात्, तथा प्रयोगाभावेनेष्टापत्तेरयोगादिति भावः।

तदनतिरिक्तत्वे इत्यादि—ग्रन्थोत्थितौ बीजं प्रदर्शयितुमाह—**नन्विति**। विशिष्टसत्त्वस्य = गुणकर्मान्यत्वादिविशिष्टसत्त्वस्य। अतिरिक्तत्वे = शुद्धसत्तातो भिन्नत्वे। शङ्कते—**न चेति**। मानमिति परेणान्वयः। **प्रतीत्यभाव इति**।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

विशिष्टसत्तावानिति प्रतीत्यभाव एव मानम्, गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव तादृशप्रतीत्यसंभवात्। न च विशिष्टनिरूपितमधिकरणत्वं यद्यतिरिक्तं, तदा विशिष्टमेवातिरिक्तमस्तु, विशिष्टाधिकरणतायाः क्लृप्ताधिकरणतास्वरूपत्वाभ्युपगमात्। किंच विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति निर्णयदशायामपि द्रव्यं न सत्तावदिति प्रत्ययप्रसंगः,

❀ विवृतिः ❀

प्रमाप्रतीत्यभाव इत्यर्थः। तेन तादृशभ्रमप्रतीतिसत्त्वेऽपि न क्षतिः। विशिष्टसत्तायाः सत्तास्वरूपत्वे यथा सत्तावान् गुण इति प्रमाप्रतीतिर्भवति तथा विशिष्टसत्तावान् गुण इत्यपि प्रमाप्रतीतिः स्यादतस्तादृशप्रतीत्यभावेन विशिष्टसत्ता सत्तातो भिन्नैवेति भावः। तद्धर्मावच्छिन्नाधिकरणत्वस्यैव तद्धर्मावच्छिन्नवानित्याकारकप्रमाप्रतीतिप्रयोजकतया गुणादौ विशिष्टसत्तात्वावच्छिन्नाधिकरणताविरहादेव गुणो विशिष्टसत्तावानिति प्रतीत्यभावनिर्वाहसम्भवे विशिष्टसत्तायाः अतिरिक्तत्वाऽभिधानं निर्युक्तिकमित्याशयेन समाधत्ते—**गुणस्येति**।

विशिष्टनिरूपितेति। विशिष्टधर्मावच्छिन्ननिरूपिताधिकरणत्वविरहादेवेत्यर्थः। पुनः शङ्कते—**न चेति**। अस्त्विति परेणान्वयः। विशिष्टनिरूपिताधिकरणत्वं = विशिष्टधर्मावच्छिन्नाधिकरणत्वं, यद्यतिरिक्तं = यदि सत्तात्वावच्छिन्नाधिकरणतातो भिन्नं। विशिष्टमेव = तादृशधर्माश्रयीभूतं विशिष्टमेव। **अतिरिक्तमिति**। विशिष्टस्यानतिरिक्तत्वेऽधिकरणतायाः वैलक्षण्यमेव दुर्वचमितिभावः। विशिष्टस्यानतिरिक्तत्वेऽपि तदधिकरणतायाः क्लृप्तद्रव्यत्वाद्यधिकरणत्वस्वरूपतया तादृशद्रव्यत्वाद्यधिकरणतायाश्च गुणादौ विरहेण न गुणो विशिष्टसत्तावान् इति प्रतीतिरित्याशयेनोत्तरयति—**विशिष्टेति**।

क्लृप्तेति। द्रव्यत्वाद्यधिकरणत्वस्वरूपत्वाभ्युपगमादित्यर्थः। ननु विशिष्टसत्तावानित्याकारकप्रतीतिविषयो यदि द्रव्यत्वाधिकरणत्वं गुणकर्मान्यत्वसत्त्वोभयाधिकरणत्वं वा, तदा विशिष्टसत्तावानित्याकारकनिश्चयकाले द्रव्यत्वाभाववानित्याद्याकारकबुद्ध्यनुपपत्तिः; द्रव्यत्वाभावबुद्धौ द्रव्यत्वाधिकरणताकनिश्चयस्य प्रतिबन्धकत्वादित्यकामेनाऽपि विशिष्टसत्ताधिकरणत्वमतिरिक्तमङ्गीकर्त्तव्यम्, तथा च विशिष्टमप्यतिरिक्तं स्यादत आह—**किञ्चेति**। न सत्तावत् = सत्तात्वावच्छिन्नाभाववत्। एवमुत्तरत्राऽपि। सत्तानिश्चयस्यैव = सत्तात्वाश्रयनिष्ठप्रकारताकनिश्चयस्यैव तदसत्त्वात् = सत्तात्वाश्रयनिष्ठप्रकारताकनिश्चयस्याऽसत्त्वात्। अयं-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

सत्ताभावबुद्धिं प्रति सत्तानिश्चयस्यैव विरोधितया तदसत्त्वात्। स्वातन्त्र्येण विरोधितान्तरकल्पने गौरवात्। एवं विशेषणविशेष्योभयग्राहकसामग्री-

❀ विवृतिः ❀

भावः—सत्तात्वावच्छिन्नाभावबुद्धौ सत्तात्वाश्रयनिष्ठप्रकारताकनिश्चय एव प्रतिबन्धकः, स च निश्चयो द्रव्यं सत्तावदित्याकारकः, न तु द्रव्यं विशिष्टसत्तावदित्याकारकः, भवन्मते विशिष्टस्यातिरिक्ततया सत्तात्वस्य विशिष्टसत्तायामसत्त्वात्। अतो विशिष्टसत्त्वं सत्त्वाऽनतिरिक्तमेवाभ्युपगन्तव्यम्। एवञ्च द्रव्यं विशिष्टसत्तावदितिनिश्चयस्यापि सत्तात्वाश्रयप्रकारताकनिश्चयस्वरूपतया तादृशनिश्चयसत्त्वे न द्रव्यं सत्ताभाववदित्याकारकप्रत्यय इति।

ननु विशिष्टस्यातिरिक्तत्वेऽपि न क्षतिः, सत्ताभावबुद्धौ सत्तानिश्चयत्वेनेव विशिष्टसत्तात्वावच्छिन्ननिश्चयत्वेनाऽपि प्रतिबन्धकत्वं कल्पयित्वैव द्रव्यं विशिष्टसत्तावदिति निश्चयदशायां द्रव्यं न सत्तावदित्याकारकप्रत्ययापादनवारणसम्भवादत आह—**स्वातन्त्र्येणेति**। सत्तात्वाश्रयनिष्ठप्रकारताशून्यविशिष्टसत्तात्वावच्छिन्नप्रकारताकत्वेनेत्यर्थः। विरोधितान्तरकल्पने = प्रतिबन्धकत्वान्तरकल्पने। **गौरवादिति**। द्रव्यं सत्तावदित्याकारकनिश्चयदशायामिव द्रव्यं विशिष्टसत्तावदित्याकारकनिश्चयदशायामपि द्रव्यं न सत्तावदित्याकारकप्रत्ययानुत्पादस्य सर्वानुभवसिद्धतया, विशिष्टस्याऽनतिरिक्तत्वपक्षे सत्तात्वाश्रयनिष्ठप्रकारताकत्वेन निरुक्तनिश्चयद्वयस्य संग्रहसम्भवात्, सत्तात्वावच्छिन्नाभावबुद्धौ सत्तात्वाश्रयनिष्ठप्रकारताकनिश्चयत्वेनोक्तनिश्चयद्वयनिष्ठैका प्रतिबन्धकता कल्प्यते, विशिष्टस्यातिरिक्तत्वे तु सत्तात्वाश्रयनिष्ठप्रकारताकत्वस्य विशिष्टसत्तानिश्चये विरहेण सत्ताभावबुद्धौ विशिष्टसत्तानिश्चयत्वेन सत्तात्वावच्छिन्ननिश्चयत्वेन च प्रतिबन्धकताद्वयकल्पनेन च गौरवापत्तिः स्यादिति भावः। प्रतिबन्धकताद्वयकल्पने गौरवमुक्त्वा वक्ष्यमाणरीत्या कारणताद्वयकल्पनेऽपि गौरवान्तरं प्रदर्शयितुमाह—**एवमिति**। विशिष्टसत्त्वस्यातिरिक्तत्वेइत्यर्थः।

विशेषणेति। विशेषणं गुणकर्मान्यत्वं, विषयीभूता च सत्ता, तयोर्यत् प्रत्यक्षाद्यात्मकं ज्ञानं तज्जनकसामग्रीविरहदशायामित्यर्थः। विशिष्टग्रहप्रसङ्गः = विशिष्टसत्तायाः प्रत्यक्षादिप्रसङ्गः। गुणकर्मान्यत्वसत्तयोरुभयोर्ज्ञानजनकसामग्रीदशायां विशिष्टसत्ताग्रहो जायते तादृशसामग्रीविरहदशायां च तद्ग्रहो न भवतीति सिद्धान्तः। विशिष्टस्य विशेषणविशेष्याभ्यां भिन्नत्वे तु विशिष्टग्रहजनकसामग्र्यपि तादृशोभयज्ञानजनकसामग्रीतो भिन्नैव वक्तव्या, एवञ्च विशिष्टग्रहोत्पत्तौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

अनतिरिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात् ।

❀ जागदीशी ❀

विरहेपि विशिष्टग्रहप्रसंगः । तदुभयग्राहकसामग्र्या विशिष्टग्रहस्य हेतुत्व-कल्पने गौरवान्तरं स्फुटमेवेत्यत आह—अनतिरिक्तत्वे त्विति । गुरवस्तु विशिष्टस्यातिरिक्तत्वादिति ग्रन्थस्य विशिष्टनिरूपिताधिकरणत्वस्यातिरिक्त-त्वादित्यर्थः । तथाच हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेन तादृश-

❀ विवृतिः ❀

विशेषणविशेष्यज्ञानजनकसामग्रीविरहोऽकिञ्चित्करः; तादृशसामग्र्याः विशिष्टग्रह-हेतुत्वस्य वक्तुमशक्यत्वादिति उभयज्ञानजनकसामग्रीविरहकालेऽपि विशिष्टसत्ता-ग्रहाऽपत्तिः, विशिष्टस्यानतिरिक्तत्वे तु विशेषणविशेष्यग्रहजनकसामग्र्यतिरिक्तस्य कस्याऽपि विशिष्टग्रहाऽजनकत्वेन तादृशसामग्रीविरहदशायां न विशिष्टग्रहापत्ति-रित्याशयः ।

ननु विशिष्टस्याऽनतिरिक्तत्वे तद्ग्रहस्य विशेषणविशेष्यग्रहानतिरिक्ततया यथा विशिष्टग्रहं प्रति विशेषणविशेष्योभयग्रहजनकसामग्रीमात्रं प्रयोजकं तथा विशिष्टस्यातिरिक्तत्वेऽपि विशिष्टग्रहं प्रति अतिरिक्तसामग्र्या इव तादृशोभयज्ञान-जनकसामग्र्या अपि प्रयोजकत्वं विवक्षणीयम्, तथा च न तादृशोभयग्राहक-सामग्रीविरहकाले विशिष्टग्रहापत्तिरत आह—तदुभयेति । विशेषणविशेष्योभय-ज्ञानजनकसामग्र्या इत्यर्थः । विशिष्टग्रहे = अतिरिक्तविशिष्टग्रहे ।

गौरवान्तरमिति । तथा च विशिष्टस्यातिरिक्तत्वे तादृशविशिष्टग्रहं प्रति विशेषणविशेष्योभयग्राहकसामग्र्यतिरिक्तसामग्र्याः तादृशोभयग्राहकसामग्र्याश्च हेतुताद्वयकल्पने महागौरवम्; विशिष्टस्याऽनतिरिक्तत्वे तु विशिष्टग्रहं प्रति तादृशोभयग्राहकसामग्रीमात्रस्यैवैकहेतुताकल्पनेन लाघवम्, अतो विशिष्टसत्त्व-मनतिरिक्तमेवेति भावः । विशिष्टस्यातिरिक्तत्वादित्यादिग्रन्थस्याशयान्तरं वर्णयतां भवानन्दतर्कवागीशानां मतं प्रदर्शयितुमाह—गुरवस्त्विति ।

इति ग्रन्थस्येति । अर्थ इति परेणान्वयः । **विशिष्टेति** । विशिष्टधर्मा-वच्छिन्ननिरूपकताकाधिकरणत्वस्येत्यर्थः । **अतिरिक्तत्वादिति** । सत्तात्वाव-च्छिन्नाधिकरणतात इत्यादिः । उक्ताधिकरणतायाः अतिरिक्तत्वे न द्रव्यं विशिष्ट-सत्त्वादित्यात्राव्याप्तिरित्याह—**तथा चेति** । **तादृशेति** । साध्यवद्वृत्तित्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

वृत्तित्वाभाववत्त्वमपि निवेश्यमतो नाव्याप्तिरित्याशयः। ननु विशिष्टाधिकरणत्वं यदि नातिरिक्तं विशिष्टसत्तावानिति प्रतीतेः प्रत्येकनिरूपिताधिकरणताद्वयावगाहितयैवोपपत्तेः। अन्यथा विशेषणाभावनिर्णयदशायामपि

❀ विवृतिः ❀

भाववत्त्वमपीत्यर्थः। अपिना पर्य्याप्तिनिवेशः सूचितः। **नाव्याप्तिरिति।** तथा च वैशिष्ट्यसत्तात्वावच्छिन्नाधिकरणत्वस्य गुणादावभावात् तादृशाधिकरणीभूतद्रव्यावच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य विशिष्टसत्तायामवर्त्तमानतया तादृशवृत्तित्वाभावाधिकरणगुणत्वभिन्नत्वस्य सत्तायां सत्त्वात् न द्रव्यं विशिष्टसत्त्वादित्यत्राव्याप्तिरिति भावः। तदनतिरिक्तत्वे त्वित्यस्यावतरणमाह **नन्विति।**

विशिष्टेति। विशिष्टनिरूपिताधिकरणत्वमित्यर्थः। यदि नातिरिक्तं = यदि सत्ताधिकरणस्वरूपम्। तथा च विशिष्टाधिकरणत्वस्यापि गुणादौ सत्त्वेन द्रव्यं विशिष्टसत्त्वादित्यत्राऽव्याप्तितादवस्थ्यमिति भावः। नन्वेवं विशिष्टसत्ताधिकरणत्वस्य सत्ताधिकरणतास्वरूपत्वे गुणो विशिष्टसत्तावानित्यपि प्रतीतिः प्रमा स्यात् तत्र सत्ताधिकरणतायाः सत्त्वादत आह **विशिष्टसत्तावानिति। प्रत्येकेति।** या विशेषणीभूतगुणकर्मान्यत्वाधिकरणता या च विशेष्यीभूतसत्ताधिकरणता तद्द्वयावगाहितयैवेत्यर्थः। **उपपत्तेरिति।** विशिष्टसत्तावानित्याकारकप्रतीतिर्गुणकर्मान्यत्वाधिकरणत्वसत्ताधिकरणत्वद्वयस्यैव विषयतया तादृशाधिकरणताद्वयस्य च गुणादौ विरहात् न गुणो विशिष्टसत्तावानिति प्रतीतेः प्रमात्वमिति भावः। उक्तप्रतीतेरधिकरणताद्वयानवगाहित्वे दोषमाह–अन्यथेति। विशिष्टसत्तावानितिप्रतीतेः तादृशाधिकरणताद्वयानवगाहित्वेऽइत्यर्थः।

विशेषणेति। गुणकर्मान्यत्वाभाववान् गुण इत्याकारकनिश्चयदशायामपीत्यर्थः। अपिना विशेष्यीभूतसत्ताभावनिश्चयदशायामपि विशिष्टसत्तावानितिप्रतीत्यापत्तिः सूचिता। **प्रतीत्यापत्तेरिति।** अयमाशयः विशिष्टसत्तावानित्याकारकप्रतीतेः विशेषणविशेष्योभयवत्तावगाहितया विशेषणीभूतगुणकर्मान्यत्वाभावनिश्चयदशायां च विशेष्यीभूतसत्ताभावनिश्चयदशायां च विशिष्टसत्तावानितिप्रतीतिर्न जायते इत्येवंसिद्धान्तः। उक्तप्रतीतिर्यदि तादृशाधिकरणताद्वयभिन्नां विलक्षणाधिकरणतामेवावगाहते तदा तादृशविलक्षणाधिकरणतावगाहिबुद्धौ विशिष्टसत्ताभावनिश्चयमात्रस्यैव प्रतिबन्धकतायाः आवश्यकतया केवलविशेषणाद्यभावनिश्चयदशायां विशिष्टसत्तावानिति प्रतीतिः स्यात् विशेषणाभावनि-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

विशिष्टसत्तावत्त्वप्रतीत्यापत्तेः। विशिष्टसत्ताबुद्धौ विशेषणाभाववत्ताज्ञानस्य प्रतिबन्धकतायाः स्वातन्त्र्येण कल्पनापातादित्युच्यते तदाप्याह—अनतिरिक्तत्वेऽइतीति प्राहुः। विशेषणेति। विशेषणं गुणकर्मान्यत्वं, विशेष्यं

❀ विवृतिः ❀

श्चयस्य विलक्षणाधिकरणताकबुद्धौ अप्रतिबन्धकत्वादतो विशिष्टसत्तावानित्याकारकप्रतीतिविषयत्वं विशेषणविशेष्याधिकरणताद्वयस्यैव स्वीकर्तव्यम्, तथा सति निरुक्ताधिकरणताद्वयावगाहिबुद्धौ विशेषणाभावनिश्चयस्यापि प्रतिबन्धकतया न गुणकर्मान्यत्वाभावनिश्चयदशायां विशिष्टसत्तावानित्याकारकप्रतीतिरिति। ननु विशिष्टसत्तावानित्याकारकविलक्षणाधिकरणताकबुद्धौ अपि विशेषणाद्यभावनिश्चयत्वेन प्रतिबन्धकताकल्पनात् न विशेषणाभावनिश्चयदशायां विशिष्टसत्तावानितिप्रतीतिरित्यत आह **विशिष्टबुद्धाविति**।

स्वातन्त्र्येणेति। ग्राह्याभावानवगाहितया मणिमन्त्रादिन्यायेनेत्यर्थः। **कल्पनापातादिति**। विशिष्टसत्तावान् इत्याकारकातिरिक्ताधिकरणताकबुद्धौ ग्राह्याभावनिश्चयत्वेन विशिष्टसत्ताभावनिश्चयस्य मणिमन्त्रादिन्यायेन विशेषणाद्यभावनिश्चयस्य च विभिन्नरूपेण प्रतिबन्धकताद्वयकल्पनं विशिष्टाधिकरणत्वस्यातिरिक्तत्ववादिनां मते, तदधिकरणतायाः अनतिरिक्तत्वमते तु ग्राह्याभावनिश्चयत्वेन विशेषणाभावनिश्चयस्य विशेष्याभावनिश्चयस्य चैकं प्रतिबन्धकमिति लाघवात् विशिष्टसत्ताधिकरणत्वमनतिरिक्तमेवेति भावः। **अनतिरिक्तत्वे इतीति**। तथाच विशिष्टाधिकरणत्वस्यानतिरिक्तत्वे हेतुतावच्छेदकावच्छिन्नाधिकरणावच्छेदेन साध्यवद्वृत्तित्वाभावविवक्षणेऽपि द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिस्तादवस्थ्यमेव, हेतुतावच्छेदकीभूतविशिष्टसत्तात्वावच्छिन्नाधिकरणतायाः गुणे विद्यमानतया तदवच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य हेतौ सत्त्वादित्याशयः। प्रकर्षसूचनाय प्राहुरित्युक्तम्।

इदमुपलक्षणं 'विशिष्टसत्ता यदि द्रव्यत्वाद्यन्यत्वे सति द्रव्यमात्रवृत्तित्वे च सति सत्ताभिन्ना स्यात् गुणकर्मान्यतरत् स्यात् इष्टापत्तौ गुणत्वे जातिर्न स्यात् कर्मत्वे चानित्यापि स्यादतो विशिष्टसत्ताऽनतिरिक्तैव वाच्येत्यपि बोद्धव्यम्। ननु गुणकर्मान्यत्वसत्त्वयोः सामानाधिकरण्यसम्बन्धस्य द्रव्यत्वव्याप्यत्वमनुपपन्नं, तादृशसामानाधिकरण्यस्य स्वरूपसम्बन्धेन सत्तायामेव सत्त्वेन तत्र च द्रव्यत्वस्य विरहादित्याह **साक्षादिति**। स्वरूपसम्बन्धेनेत्यर्थः। तस्य = गुणकर्मान्यत्वसत्त्वयोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिन्त्यम् ।

❀ जागदीशी ❀

सत्ता, तयोः सामानाधिकरण्यात्मकसम्बन्धस्यैवेत्यर्थः। साक्षात्सम्बन्धेन तस्य व्यभिचारित्वादाह—परंपरयेति। अवच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः। सत्त्वगुणकर्मान्यत्वयोर्द्रव्ये एव सामानाधिकरण्यमिति प्रतीत्या अवच्छेदकतासम्बन्धेन तदुभयसामानाधिकरण्यस्य द्रव्य एव सत्त्वान्न व्यभिचार इति भावः ।

नन्वेवं ज्ञेयत्वाधिकरणघटाद्यवच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य पटीयरूपादावेव सत्त्वात्तदधिकरणभिन्नत्वमस्त्येव ज्ञेयत्वादिहेतोरित्यग्रे केवलान्वयिन्यव्याप्तिप्रदर्शनमसंगतमत आह—केवलान्वयिनीति। द्वितीयेति।

❀ विवृतिः ❀

सामानाधिकरण्यात्मकसम्बन्धस्य । व्यभिचारित्वादिति । तथाच तस्यालक्ष्यतया तत्र लक्षणसंगमनप्रकारः प्रदर्शनप्रयासोऽनुचित इतिभावः।

परम्परयेतीति। दीधितिकार इति शेषः। ननु तर्हि कीदृशः परम्परासम्बन्धो हेतुतावच्छेदकतया अंगीकर्तव्य इत्यकांक्षायामाहावच्छेदकत्वाख्येति। अवच्छेदकतात्मकस्वरूपसम्बन्धेनेत्यर्थः। अवच्छेदकतासम्बन्धेन निरुक्तसामानाधिकरण्यस्य हेतुत्वे तु न व्यभिचार इत्याह सत्त्वेति। द्रव्य एव = द्रव्यनिष्ठावच्छेदकताकमेव। एवकारात् गुणादिव्यवच्छेदः।

तदुभयेति। गुणकर्मान्यत्वसत्त्वयोरुभयोः सामानाधिकरण्यस्य। न व्यभिचार इति। अवच्छेदकतासम्बन्धेन तादृशसामानाधिकरण्यवति द्रव्यमात्रे द्रव्यत्वाभावस्यासत्त्वादिति भावः। नन्वेवमिति। एवं = प्रथमलक्षणस्य हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाधिकरणभिन्नत्वार्थकत्वे पटीयरूपादावेवेत्यनेन हेत्वधिकरणे घटादौ सम्बन्धान्तरेण वर्त्तमाने वाच्यत्ववद्वृत्तित्वाभावमुक्त्वा तादृशहेत्वधिकरणस्य तादृशाभावावच्छेदकत्वं प्रदर्शितम्। तदधिकरणभिन्नत्वं = वाच्यत्ववद्वृत्तित्वाभावाधिकरणीभूतं यद्घटीयरूपं तद्भिन्नत्वम्। द्वितीयलक्षणे केवलान्वयिन्यव्याप्तिमुपपादयति तत्रेति। द्वितीयलक्षणे इत्यर्थः। घटकत्वं सप्तम्यर्थः। अस्य च साध्यवद्भिन्नेन सहान्वयः। साध्यवद्भिन्नस्य = वाच्यत्ववद्भिन्नस्य। द्वितीयलक्षणस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वार्थकत्वादित्याशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

तत्र साध्यवद्भिन्नस्याप्रसिद्धत्वादिति भावः। यद्यपीदं वाच्यं प्रमेयादित्यादौ तादात्म्येन केवलान्वयिनि हेतौ प्रथमलक्षणेऽव्याप्तिः सम्भवति प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यकत्वविरहिणोऽप्रसिद्धेः। न च घटाद्यवच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः। तथासति घटत्वं घटे न वाच्यमिति प्रतीत्यापत्तेः, तथापि स्वाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावोऽत्र लक्षणघटक इत्यभिप्रायेण द्वितीयलक्षणाभिधानं,

❀ विवृतिः ❀

अप्रसिद्धत्वादिति। तथा च द्वितीयलक्षणे एव केवलान्वयिन्यव्याप्तिः, प्रथमलक्षणे केवलान्वयिन्यव्याप्तिविरहेऽपि न क्षतिरितिभावः। ननु वाच्यत्वसाध्यकतादात्म्येन प्रमेयरूपकेवलान्वयिनि हेतौ वाच्यत्ववत्तादात्म्यसम्बन्धावच्छिन्नवृत्तित्वरूपस्य वाच्यत्ववत्तादात्म्यकत्वस्य सर्वत्र सत्त्वात् प्रमेयसम्बन्धिरूपतादात्म्येन प्रमेयाधिकरणप्रमेयावच्छेदेन तादृशतादात्म्यकत्वाऽभावाऽप्रसिद्धया प्रथमलक्षणे एव केवलान्वयिन्यव्याप्तिसम्भवे द्वितीयलक्षणे तत्राऽव्याप्त्यभिधानमसंगतमित्याशंकते **यद्यपीति। अप्रसिद्धेरिति।** वाच्यत्ववत्तादात्म्यकत्वस्यापि केवलान्वयित्वादित्याशयः। ननु तादात्म्यसम्बन्धेन प्रमेयसम्बन्धिघटावच्छेदेन तादात्म्यकत्वाभाववत्त्वस्य घटत्वे वर्त्तमानतया तादृशघटत्वभिन्नत्वस्य घटादिरूपप्रमेये तादृशघटत्वावच्छेदेन च वाच्यत्ववत्तादात्म्यकत्वाभावस्य घटे सत्त्वेन तादृशघटादिभिन्नत्वस्य च घटत्वादिरूपप्रमेये सत्त्वात् लक्षणसमन्वयसम्भवे कथं प्रथमलक्षणेऽपि केवलान्वयिन्यव्याप्तिः संभवतीत्याशंकते **न चेति।** सुलभ इतिपरेणान्वयः।

उत्तरयति **तथासतीति।** निरुक्तरीत्या वाच्यत्ववत्तादात्म्यकत्वविरहस्य प्रसिद्धत्वे सतीत्यर्थः। न वाच्यम् = न वाच्यत्ववत्। **प्रतीत्यापत्तेरिति।** वाच्यत्ववत्तादात्म्यकत्वस्यैव वाच्यत्वस्वरूपतया घटावच्छेदेन तादृशतादात्म्यकत्वाभावस्य घटत्वे सत्त्वे घटावच्छेदेन वाच्यत्वाभावोऽपि घटत्वे वर्त्ततामित्याकारकप्रतीत्यापत्तेः। न चेष्टापत्तिरनुभवविरोधात्, वाच्यत्वाभावस्यावस्तुत्वेन घटावच्छिन्नत्वस्य तत्र भानाऽसम्भवाच्चेतिभावः।

यद्यपीत्यस्योत्तरमाह **तथापीति। स्वाधिकरणेति।** तत्तद्धेत्वधिकरणानुयोगिकहेतुतावच्छेदकसम्बन्धेनेत्यर्थः। साध्यवद्वृत्तित्वाभावप्रतियोगिवृत्तित्वान्वितमवच्छिन्नत्वं तृतीयार्थः। **लक्षणघटकइति।** तथा च हेत्वधिकरणावच्छेद्यो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

स्वपदस्य तत्तत्साधनव्यक्तिपरतया तादात्म्येन पटात्मकहेत्वधिकरणी-व्यक्तिनिरूपिततादात्म्येन वाच्यत्ववत्तादात्म्यकत्वाभावस्य पटावच्छेदेन पटत्वादावेव प्रसिद्धेः । वस्तुतस्तु केवलान्वयिन्यभावादिति मूले केवलान्वयित्वं वृत्तिमदत्यन्ताभावाप्रतियोगित्वमात्रं न त्ववच्छेदकगर्भम् । तथाच तादात्म्येन किंचिदपि प्रमेयं न

❀ विवृतिः ❀

यो हेत्वधिकरणानुयोगिकहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वस्याभावस्तदधि-करणभिन्नत्वं हेतौ व्याप्तिरिति भावः । इत्यभिप्रेत्य = हेत्वधिकरणानुयोगिकहेतु-तावच्छेदकसम्बन्धावच्छिन्नस्य साध्यवद्वृत्तित्वस्य प्रवेशमभिप्रेत्य । द्वितीयलक्षणा-भिधानम् = द्वितीयलक्षणे एव केवलान्वयिन्यव्याप्त्यभिधानम् । उक्तविवक्षया वाच्यं प्रमेयादित्यत्राशंकितामव्याप्तिं वारयति **स्वपदस्येति** ।

तत्तदिति । तत्तद्धेतुबोधेच्छयोच्चरितया । **पटात्मकेति** । पटस्वरूपो यः प्रमेयस्तद्रूपहेत्वधिकरणीभूतः पटस्तादृशपटव्यक्त्यनुयोगिकतादात्म्यसम्बन्धे-नेत्यर्थः । अवच्छिन्नत्वात्मकतृतीयार्थस्य वाच्यत्ववत्तादात्म्यकत्वेऽन्वयो बोध्यः । **पटत्वादावेवेति** । आदिना पटीयरूपादिपरिग्रहः । **प्रसिद्धेरिति** । न चात्रापि पटत्वं पटे न वाच्यमित्याकारकप्रतीत्यापत्तिरिति वाच्यम् । पटानुयोगिकतादात्म्य-सम्बन्धेन वाच्यत्ववत्तादात्म्यकत्वस्य पटमात्रवृत्तितया तस्य वाच्यत्वानात्मकत्वेन पटावच्छिन्नवाच्यत्ववत्तादात्म्यकत्वाभावस्य पटत्वावच्छिन्नवाच्यत्वाभावानात्मकतया तथाप्रतीतेरसम्भवादितिध्येयम् ।

तथा च तादात्म्येन प्रमेयवत्पटानुयोगिकतादात्म्यसम्बन्धेन वाच्यत्ववत्ता-दात्म्यकत्वाभावस्य पटावच्छिन्नस्याधिकरणपटत्वादिभिन्नत्वमादाय पटरूपप्रमेये यथालक्षणसमन्वयस्तथा घटादिरूपप्रमेयेऽपि निरुक्तरीत्या लक्षणगमनात् न प्रमेयस्य तादात्म्यसम्बन्धेन हेतुतास्थलेऽव्याप्तिरिति भावः ।

ननूक्तरीत्या वाच्यं प्रमेयादित्यादौ तत्तत्पटादिकमादाय लक्षणसमन्वय-सम्भवेऽपि प्रमेयत्वावच्छेदेन व्याप्यत्वज्ञानानुपपत्तिः, न चेष्टापत्तिः, तथासति प्रमेयत्वावच्छिन्नं वाच्यत्वाऽव्याप्यमित्यपि व्यवहारापत्तेरत आह—**वस्तुतस्त्विति** । वृत्तिमदत्यन्ताभावइत्यत्रात्यन्तपदं सम्पातायातम् । अतएवाग्रे तथा चेत्यादिना अन्योन्याभावमादायैव तादात्म्येन प्रमेयमात्रस्य केवलान्वयित्वनिराकरणं साधु संगच्छते इत्यवधेयम् । तथा च वृत्तिमान् योऽभावस्तन्निरूपितकेवलान्वयिता—घटकसम्बन्धावच्छिन्नप्रतियोगित्वाभाववत्त्वमेव केवलान्वयित्वमिति भावः । मात्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

केवलान्वयीति द्वितीयलक्षणे एव तादृशकेवलान्वयिन्यव्याप्तिसंभवात्

❀ विवृतिः ❀

पदव्यवच्छेद्यमाह—**न त्ववच्छेदकगर्भमिति।** न तु वृत्तिमान् योऽभावस्तन्निरूपितकेवलान्वयिताघटकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं केवलान्वयित्वमितिपूर्वेणान्वयः।

तथा चेति। तादृशाभावाप्रतियोगित्वमात्रस्य केवलान्वयित्वे चेत्यर्थः। किञ्चिदपि प्रमेयम् = घटपटाद्यात्मकं प्रमेयं। न केवलान्वयि = न तादात्म्यसम्बन्धावच्छिन्नतादृशाभावाऽप्रतियोगि ॥ घटपटादिभेदप्रतियोगित्वस्य सर्वत्र घटपटादौ सत्त्वेन प्रमेयमात्रे सत्त्वादितिभावः। तादृशकेवलान्वयिनि वृत्तिमत्तादृशाभावाप्रतियोगिनि प्रमेयत्ववाच्यत्वादौ। **अव्याप्तिसंभवादिति।** तथा च केवलान्वयिन्यव्याप्तेरभिधानमित्यादि ग्रन्थस्य वृत्तिमत्तादृशाभावाप्रतियोगिन्यव्याप्त्यभिधानं द्वितीयलक्षणाऽभिप्रायेणेत्यर्थ इति भावः। **यथाश्रुतमेवेति।** हेत्वधिकरणानुयोगिकत्वं हेतुतावच्छेदकसम्बन्धेऽनिवेश्य पूर्वोक्त एव लक्षणार्थो रमणीय इत्याशयः।

इदं तु तत्त्वम् केवलान्वयिन्यव्याप्तिरित्यत्र केवलान्वयित्वं यदि वृत्तिमदभावनिरूपितकेवलान्वयिताघटकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वरूपं तदा तादात्म्येन प्रमेयस्यापि केवलान्वयित्वं सम्भवति। वृत्तिमदभावपदेन घटादिभेदस्योपादातुं शक्यत्वेऽपि तादृशभेदप्रतियोगितावच्छेदकत्वस्य घटत्वादावेव सत्त्वेन प्रमेयत्वे विरहात् तादात्म्येन प्रमेयमात्रभेदस्याप्रसिद्धेः। एवञ्च निरुक्तकेवलान्वयिनि प्रथमलक्षणेऽपि यथोक्तरीत्या अव्याप्तिसम्भवात् द्वितीयलक्षणेऽव्याप्त्यभिधानमसङ्गतम् अतः केवलान्वयिन्यव्याप्तिरित्यत्र केवलान्वयित्वं वृत्तिमदभावनिरूपितकेवलान्वयिताघटकसम्बन्धावच्छिन्नप्रतियोगित्वाभाववत्त्वरूपमेव वक्तव्यम्। तथा च तादात्म्येन घटपटादीनां सर्वेषामेव भेदप्रतियोगितायाः घटपटादिरूपे सर्वत्र प्रमेये वर्त्तमानतया कस्यापि प्रमेयस्य केवलान्वयित्वाऽसम्भवात् तादृशप्रमेये प्रथमलक्षणस्याव्याप्तिसम्भवेऽपि न क्षतिरिति। मणिकारमते वृत्तिमदभावप्रतियोगितानवच्छेकधर्मवत्त्वस्यैव केवलान्वयितया ध्येयमित्युक्तम्।

केचित्तु केवलान्वयिन्यव्याप्तिरित्यादिग्रन्थस्य केवलान्वयिसामान्येऽव्याप्त्यभिधानमित्येवार्थः करणीयः, केवलान्वयित्वञ्चावच्छेदकगर्भमेव, एवञ्च यत्किञ्चित् केवलान्वयिनि प्रमेये प्रथमलक्षणस्याव्याप्तिसत्त्वेऽपि न क्षतिः।

वाच्यत्वसाध्यकज्ञेयत्वहेतौ प्रथमलक्षणसमन्वयस्य पूर्वमुक्तत्वादिति व्याचक्षा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत् सत्ता-

❀ जागदीशी ❀

यथाश्रुतमेव सम्यगिति ध्येयम्। नव्यास्तु केवलान्वयिनि चाव्याप्तेरिति केवलान्वयिसामन्येऽव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः, प्रथमलक्षणे यत्किंचित्केवलान्वयिनि तादात्म्येन प्रमेयादिहेतावव्याप्तावपि न क्षतिरित्याहुः। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिः सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावं गुणादाववगाहते इत्यत्र समानाकारकप्रतीतिं दृष्टान्तयति—द्रव्यत्वे गुणइत्यादि। न तूक्तप्रतीतेः गुणावच्छेदेन द्रव्यत्वे पृथिवीत्वसामानाधिकरण्याभावो विषयः, गुणस्य द्रव्य-

❀ विवृतिः ❀

णानां मतमाह—नव्यास्त्वित्यादिना आहुरित्यन्तेनेति संक्षेपः। सार्वभौममते द्रव्यं सत्त्वादित्यत्र हेत्वधिकरणगुणावच्छेद्यद्रव्यत्ववद्वृत्तित्वाभावस्य सत्तायां सत्त्वात् अतिव्याप्तिवारणं तदैव स्याद्यदि सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्याकारकप्रतीतिः गुणावच्छिन्नं द्रव्यत्ववद्वृत्तित्वाभावं सत्तायामवगाहते तदेव तु नेत्याह दीधितौ—सत्तायामिति।

प्रतीतिर्हि इति। अवगाहते इत्यग्रिमेणान्वयः। ननूक्तप्रतीतिः कथं गुणावच्छिन्नद्रव्यवृत्तित्वाभावं सत्तायां नावगाहते इत्याशङ्कायामाह—द्रव्यत्व इति। प्रतीतिवदिति। तथा च यथा गुणस्य द्रव्यत्वानधिकरणतया द्रव्यत्वे वर्त्तमानस्य पृथिवीत्ववद्वृत्तित्वाभावस्य अवच्छेदकत्वाऽसम्भवात् द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमित्याकारिका प्रतीतिर्गुणावच्छिन्नं पृथिवीवृत्तित्वाभावं द्रव्यत्वे नावगाहते, तथा सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्याकारिका प्रतीतिर्गुणावच्छिन्नं द्रव्यवृत्तित्वाभावं सत्तायामवगाहितुं न शक्नोतीति भावः। कस्तर्हि सत्तायामित्यादिप्रतीतेर्विषय इत्यत आह—सामानाधिकरण्येति।

टीकायां समानाकारकप्रतीतिमिति। गुणवृत्तिर्किंचिन्निरूपितसामानाधिकरण्यावच्छेदकत्वाभावविषयकत्वस्य गुणे वर्त्तमानो यः द्रव्यत्वनिष्ठपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वाभावस्तद्विषयकद्रव्यत्वे इत्यादिप्रतीतौ सत्त्वात् समानाकारकत्वमिति ध्येयम्। ननु द्रव्यत्वे गुणे नेत्यादिप्रतीतिर्गुणावच्छिन्नपृथिवीवृत्ति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

निष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य—

❀ जागदीशी ❀

त्वानधिकरणतया तन्निष्ठपृथिवीवृत्तित्वाभावावच्छेदकत्वासंभवात्। किन्तु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तदवच्छेदकत्वाभाव एव गुणे विषय इति तद्धदीयमपीति भावः। **अवच्छेदकत्वाभावमिति**। प्रात्यक्षिक-प्रत्ययाभिप्रायेणेदम्, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यादिशाब्द-

❀ विवृतिः ❀

त्वाभावमेव द्रव्यत्वे कथं नावगाहते इत्यत आह—**गुणस्येति**। गुणसामान्य-स्येत्यर्थः। **द्रव्यत्वानधिकरणतयेति**। केनापि सम्बन्धेनेत्यादिः। गुण-सामान्यान्तर्गते नित्यगुणे कालिकेनापि द्रव्यत्वस्यासत्त्वादिति भावः। **तन्निष्ठेति**। द्रव्यत्वे वर्त्तमानस्य पृथिवीवृत्तित्वाभावस्यावच्छेदकत्वाऽसम्भवादित्यर्थः। द्रव्य-त्वाधिकरणस्यैव द्रव्यत्वनिष्ठधर्मस्य पृथिवीवृत्तित्वाभावादेरवच्छेदकत्वं सम्भवति गुणादेश्च द्रव्यत्वानधिकरणत्वादित्याशयः।

इयमपीति। सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्याकारकप्रतीतिर-पीत्यर्थः। उक्तप्रतीतेरपि सत्तानिष्ठं यद् द्रव्यत्वसामानाधिकरण्यं तदवच्छेदक-त्वाभाव एव गुणे विषय इति तु परमार्थः।

ननूक्तप्रतीतेः शाब्दबोधात्मकत्वे कथं तस्याः गुणे वर्त्तमानस्य सत्तानिष्ठद्रव्य-वृत्तित्वस्यावच्छेदकत्वाभावो विषयः। अवच्छेदकत्वस्य पदानुपस्थाप्यतया नञ-र्थेन सह तस्यापदार्थस्यान्वयाऽसम्भवादत आह—**प्रात्यक्षिकेति**। औपनायिक-मानसप्रत्यक्षाऽभिप्रायेणेत्यर्थः। तेन तादृशप्रतीतिविषयतावत्पदार्थानां बहिरिन्द्रियायोग्यत्वेऽपि न क्षतिरिति ध्येयम्। तथा चावच्छेदकत्वस्य पदानुपस्थाप्यत्वेऽपि न क्षतिः, तादृशप्रत्यक्षे पदोपस्थाप्यत्वस्यातन्त्रत्वादित्याशयः।

गुणपदोत्तरसप्तम्यर्थस्यावच्छेदकत्वे गुणवृत्तितया सामानाधिकरण्यावच्छेकत्वा-भावस्य बोधासम्भवादाहावच्छेदकत्वविति। अवच्छेदकत्वोपस्थितिजनकाव-च्छेदकत्वपदस्य तदर्थकविभक्त्यादेश्च विरहादित्यर्थः। न च द्रव्यत्वसामानाधिकर-ण्यशब्दोत्तरप्रथमाविभक्त्यर्थ एवावच्छेदकत्वमिति वाच्यम्। प्रथमायास्तदर्थकत्व-स्याऽदृष्टचरत्वात् तादृशसामानाधिकरण्यमितीत्यत्र इति पदार्थे ज्ञाने विषयतात्म-कस्य तदर्थस्यान्वयाऽसम्भवापत्तेश्च। उक्तप्रतीतेः शाब्दात्मकत्वे गुणवृत्तितया सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वाभावाविषयकत्वेऽपि गुणपदोत्तरसप्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

परम्परासम्बन्धेन द्रव्यत्वसामानाधिकरण्यस्य वा अभावं गुणेऽवगाहते,

❀ जागदीशी ❀

स्थलेऽवच्छेदकत्वोपस्थापकपदान्तरविरहात्तदभावस्य गुणादौ बोधयितुमशक्यत्वात् । किन्तु सत्तानिष्ठं द्रव्यत्वसामानाधिकरण्यं न गुणे-न गुणावच्छेद्यमित्याकारकएव तत्र बोधः । गुणादावित्यत्र सप्तम्यर्थस्य नञर्थेऽन्वयादितिध्येयम् । नन्वेवं तादृशप्रतीतेः सामानाधिकरण्याभावविषयकत्वमनुभवसिद्धं विरुध्येत । सामानाधिकरण्यस्य व्याप्यवृत्तित्वे तदवच्छेदकत्वाप्रसिद्ध्या तादृशावच्छेदकत्वाभावविषयकत्वे प्रतीतेर्भ्रमत्वापत्तिश्च स्यादत आह—**परम्परासम्बन्धेनेति** ॥

❀ विवृतिः ❀

स्यर्थावच्छिन्नत्वस्य नञर्थाभावेन सहान्वयं स्वीकृत्य; सत्तानिष्ठद्रव्यत्वसामानाधिकरण्ये गुणावच्छिन्नत्वाभावस्य तादृशगुणावच्छिन्नभेदस्य वा विषयताकत्वमेव सम्भवतीत्याह—**किन्त्विति** । तत्र = सत्तायामित्याद्यभिलापस्थले । सप्तम्यर्थस्य = अवच्छेद्यत्वस्य । नञर्थे = अभावे, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्याकारकशब्दात् गुणावच्छेद्यत्वाभावस्य गुणावच्छेद्यभेदस्य वा तादृशसामानाधिकरण्ये बोधो न सम्भवति नञाऽत्यन्ताभावबोधनेऽनुयोगिनि सप्तम्यपेक्षायाः अन्योन्याभावबोधने च प्रतियोग्यनुयोगिनोः समानविभक्तिकत्वस्य तन्त्रत्वादतो ध्येयमित्युक्तम् ।

एवमिति । उक्तप्रतीतेः गुणादौ तादृशसामानाधिकरण्यावच्छेदकत्वाभावावगाहित्वे । तादृशप्रतीतेः = सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्याकारकप्रतीतेः । **समानाधिकरण्याभावविषयकत्वमिति** । नञः स्वोत्तरपदार्थान्वयित्वव्युत्पत्तेः जले न गन्ध इत्यत्र गन्धाभावस्यैव बोधनादित्यर्थः । अनुभवसिद्धम् = अनुव्यवसायविषयीकृतम् । सामानाधिकरण्याभावविषयकत्वस्यानुभवसिद्धत्वे विवादादाह—**सामानाधिकरण्यस्येति** । व्याप्यवृत्तित्वेन = स्वाधिकरणवृत्त्यभावप्रतियोगिभिन्नत्वेन । तदवच्छेदकत्वाऽप्रसिद्ध्या = सामानाधिकरण्यनिरूपितावच्छेदकत्वस्याप्रसिद्ध्या ।

तादृशेति । सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वाभावविषयकप्रतीतेरित्यर्थः । **भ्रमत्वापत्तिरिति** । अवच्छेदकतायां सामानाधिकरण्यनिरूपितत्व-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

न तु सत्तायामेव द्रव्यवृत्तित्वाभावं,

❀ जागदीशी ❀

निरूपकताख्यस्वरूपसम्बन्धेनेत्यर्थः। न त्ववच्छेदकताख्यस्वरूपसम्बन्धेनेत्यर्थः। तथा सति सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसङ्गात्। सामानाधिकरण्यस्य व्याप्यवृत्तितया कुत्राप्यवच्छेदकत्वसम्बन्धेन तस्यासत्त्वात्। **न त्विति**। तथाच द्रव्यं सत्त्वादित्यादावतिव्याप्तिरितिभावः॥

❀ विवृतिः ❀

स्यासत्त्वेनोक्तप्रतीतेरवच्छेदकत्वांशे सामानाधिकरण्यनिरूपितत्वाभाववति सामानाधिकरण्यनिरूपितत्वप्रकारतया भ्रमत्वमिति भावः।

निरूपकताख्यस्वरूपसम्बन्धेनेति। द्रव्यत्वसामानाधिकरण्यं निरूपकतासम्बन्धेन द्रव्यत्वे वर्तते, तेन सम्बन्धेन तदभावस्तु गुणादावबाधित एवेति भावः। ननु अवच्छेदकत्वसम्बन्धस्य द्रव्यत्वादिसामानाधिकरण्यस्य व्यधिकरणसम्बन्धतया तेन सम्बन्धेन तादृशसामानाधिकरण्याभावस्य सर्वत्र सत्त्वात् गुणादावपि अवच्छेदकतासम्बन्धेन सामानाधिकरण्याभावस्याबाधिततया तादृशसम्बन्धेन सामानाधिकरण्याभाव एवोक्तप्रतीतेर्विषयोऽस्तु व्यर्थं निरूपकतायास्तादृशाभावप्रतियोगितावच्छेदकसम्बन्धत्वाभिधानमतआह **नन्विति**।

तथा सतीति। उक्तप्रतीतेः अवच्छेदकतासम्बन्धेन द्रव्यत्वसामानाधिकरण्याभावविषयकत्वे सतीत्यर्थः। इति प्रतीतिप्रसङ्गात् = इत्याकारकयथार्थप्रत्ययप्रसङ्गात्। कुत इत्याकांक्षायामाह **सामानाधिकरण्यस्येति**। तस्य = सामानाधिकरण्यस्य। **असत्त्वादिति**। तथा चावच्छेदकत्वसम्बन्धस्य सामानाधिकरण्यव्यधिकरणसम्बन्धतया तेन सम्बन्धेन तदभावस्य संयोगेन गुणाभावादेरिव केवलान्वयितया सर्वत्र सत्त्वेन सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यापि अवच्छेदकतासम्बन्धेनाभावस्य द्रव्यवृत्तौ बाधकाभावात् सत्तायां द्रव्ये न द्रव्यत्वसामानाधिकरण्यमिति प्रतीत्यापत्तिरतो निरूपकतासम्बन्धेनैव तादृशसामानाधिकरण्याभावो वक्तव्यः। एवञ्च निरूपकतासम्बन्धेन द्रव्यत्वसामानाधिकरण्यस्य द्रव्ये सत्त्वान्न सत्तायां द्रव्ये द्रव्यत्वसामानाधिकरण्यमिति प्रतीत्यापत्तिरिति भावः भावमाह **तथा चेति**।

अतिव्याप्तिरिति। उक्तप्रतीत्या गुणावच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्य सत्तायामसिद्धत्वेन तादृशगुणावच्छिन्नद्रव्यवृत्तित्वाभावाधिकरणद्रव्यगुणान्यतर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

सत्ता न द्रव्यवृत्तित्वाभाववती,

❀ जागदीशी ❀

ननूक्तदृष्टान्तस्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽस्तु प्रतीतेर्विषयः, प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वे न किंचिद्बाधकमस्तीत्यतो बाधकमाह—**सत्ता नेति** ॥ तथाच सत्तायां द्रव्यवृत्तित्वाभावसत्त्वे द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीरतत्र न स्यादिति भावः। ननु द्रव्यवृत्तित्वाभाव इव

❀ विवृतिः ❀

त्वभिन्नत्वस्य सत्तायां विद्यमानत्वादित्याशयः। **उक्तदृष्टान्तस्थले इति**। द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमित्याकारकप्रतीतिरूपदृष्टान्तस्थले इत्यर्थः। बाधकसत्त्वात् = गुणादेः द्रव्यत्वानधिकरणत्वरूपबाधकस्य विद्यमानत्वात्। गुणादिनिष्ठद्रव्यत्वानधिकरणत्वस्यैव गुणादौ पृथिवीवृत्तित्वाभावावच्छेदकत्वाभावबुद्धौ प्रयोजकत्वादित्याशयः। अवच्छेदकत्वाभावः = गुणवृत्तिद्रव्यत्वनिष्ठपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वाभावः। प्रतीतेः = दृष्टान्तीभूतायाः निरुक्तायाः प्रतीतेः। प्रकृते तु = सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यम् इत्याकारकप्रतीतिस्थले तु। **साक्षादिति**। समवायावच्छिन्नद्रव्यवृत्तित्वाभावविषयकत्वे इत्यर्थः।

न किंचिद्बाधकमस्तीति। गुणस्य सत्ताधिकरणत्वेन तस्य तन्निष्ठद्रव्यवृत्तित्वाभावावच्छेदकत्वे बाधकाभावादिति भावः। **न स्यादिति**। यतः द्रव्यवृत्तित्वाभाववद्भिन्नत्वधीः सत्तायामुत्पद्यते अत एव सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्न सत्तानिष्ठद्रव्यवृत्तित्वाभावविषयिणी, सत्तायां द्रव्यवृत्तित्वाभावबुद्धौ तत्र द्रव्यवृत्तित्वाभाववद्भिन्नत्वज्ञानस्य प्रतिबन्धकत्वादित्याशयः। बाधकप्रतीतिद्वयप्रदर्शनस्य प्रयोजनं दर्शयितुं शंकते **नन्विति**। सत्ता न द्रव्यवृत्तित्वाभाववतीत्याकारकप्रतीतेर्विषयो यदि द्रव्यवृत्तित्वाभाववद्भेदस्तदाप्याह **तद्वद्भेदोऽपीति**। द्रव्यवृत्तित्वाभाववद्भेदोऽपीत्यर्थः। **तथा चेति**। द्रव्यवृत्तित्वाभावस्य तद्वद्भेदस्याव्याप्यवृत्तित्वे चेत्यर्थः। **तयोरिति**। द्रव्यावच्छिन्नद्रव्यवृत्तित्वगुणावच्छिन्नद्रव्यवृत्तित्वाभावयोः, समावेशात् = सत्त्वात्। **कुतो विरोधइति**। परस्पराधिकरणाऽवृत्तित्वं हि परस्परयोर्विरोधः, द्वयोरेकत्र सत्त्वे तु तन्नास्तीति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनसिद्ध-प्रतीतिवाधितत्वात् ।

वाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः ।

❀ जागदीशी ❀

तद्वद्भेदोऽप्यव्याप्यवृत्तिर्वाच्यः । तथा च द्रव्यगुणात्मकविभिन्नावच्छेदेन तयोः सत्तायां समावेशात्कुतो विरोध इत्यत आह—द्रव्यवृत्तित्वाभावइति । नन्वेवं मूले न कपिसंयोगीति प्रतीत्या वृक्षादौ कपिसंयोगाभावोपि न सिद्ध्येत्तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूले अवगाहनसंभवादत आह—वाधकाभावात्त्विति ॥ कपिसंयोगाभावो न वृक्षवृत्तिरित्यादिप्रत्यय-

---

❀ विवृतिः ❀

द्रव्यवृत्तित्वाभाव इतीति । तथा च द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्याकारकप्रतीतेः द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वाभावविषयकतया सत्तावृत्तित्वाऽभावस्य चावच्छेदकभेदाऽप्रसिद्धया सत्तायां द्रव्यवृत्तित्वाभावबुद्धिप्रतिबन्धकत्वमानुभविकमिति हृदयम् । वृक्षे मूले न कपिसंयोग इत्याकारकप्रतीतेरपि तुल्ययुक्त्या मूलवृत्तिवृक्षनिष्ठकपिसंयोगावच्छेदकत्वाभावविषयकत्वसम्भवेन सर्वजनानुभवसिद्धस्य वृक्षे मूलावच्छिन्नकपिसंयोगाभावस्य सिद्धिर्न स्यादित्याशंकानिवृत्यर्थं बाधकाभावाच्चेत्यादि ग्रन्थमभिदधानस्य दीधितिकारस्य भावं प्रदर्शयितुमाह कपिसंयोगाभावो नेति । कपिसंयोगाभावो न वृक्षवृत्तिरित्याकारकप्रत्ययस्य सिद्धत्वे तस्यैव वृक्षे संयोगाभावसिद्धिप्रतिबन्धकतया तत्सिद्धिस्तत्र न स्यात् तदेव तु नेत्याहासिद्धत्वादिति । दीधितौ दोषान्तराभिधानस्य बीजं प्रदर्शयितुं शंकते नन्विति । प्रत्यादिति । तथा चोक्तप्रत्यय एव द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्याकारकप्रतीत्यनुत्पादे प्रयोजकः । घटसामान्ये गृहवृत्तित्वाभावज्ञानानुत्पादप्रयोजको नीलघटे गृहवृत्तित्वप्रत्यय इवानुभवसिद्धइति भावः ।

ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरितिप्रतीतेरेव पूर्वसिद्धत्वात् कथं द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरित्याकारकप्रत्ययः अतआह—एकशेषस्येति । कदाचित् द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरित्यस्या अपि प्रतीतेः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

अतीन्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च, तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः ।

❀ जागदीशी ❀

स्यासंभवादिति भावः ॥ ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरेवासिद्धा, द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृतिरिति प्रत्ययात् , एकशेषस्य कर्तुमशक्यत्वादतो दोषान्तरमाह—**अतीन्द्रियेति** । मनस्त्ववदणुत्वादित्यादावित्यर्थः । तत्र = अतीन्द्रियसाध्यके असद्धेतौ । ननु प्रत्यक्षासंभवेनाप्यणुत्वं मनस्त्वसामानाधिकरण्याभाववन्मनस्त्वाभाववद्वृत्तित्वात्

❀ विवृतिः ❀

पूर्वत्वसम्भवेन निरुक्तप्रतीत्योः कस्याश्चित् पूर्वत्वं कस्याश्चिन्नेत्यस्य वक्तुमशक्यत्वादिति भावः ।

इदमुपलक्षणं-अभावस्याधिकरणभेदेन भिन्नतया गुणत्वादिनिष्ठस्य द्रव्यवृत्तित्वाभावस्य सत्तावृत्तित्वाभाववत्त्वावगाहिप्रत्ययस्य सत्त्वेऽपि गुणावच्छिन्नद्रव्यवृत्तित्वाभावे सत्तावृत्तित्वावगाहिप्रत्ययोपपत्तौ बाधकाभाव इत्यपि बोद्धव्यम् ।

दोषान्तरमिति । तथा च द्रव्यं सत्त्वादित्यादौ गुणावच्छिन्नद्रव्यवृत्तित्वाभावस्य सत्तायां सत्त्वान्नातिव्याप्तिरतो दोषान्तरप्रदर्शनमित्याशयः । प्रमाणसिद्धो हि हेतुनिष्ठः साध्यवद्वृत्तित्वाभावोऽतिव्याप्तिवारकः न तु प्रमाणाऽसिद्ध इत्याशयेनाह दीधितौ **अतीन्द्रियेति** । अतीन्द्रियं साध्यं यस्य = अतीन्द्रियव्यभिचारिणो हेतोस्तादृशे व्यभिचारिणि हेतावित्यर्थः । साध्यस्येन्द्रिययोग्यत्वे साध्यवद्वृत्तित्वाभावस्य योग्यप्रतियोगिकत्वेन प्रत्यक्षं सम्भवति हेतोरिन्द्रिययोग्यत्वेऽपि हेतुविषयकचाक्षुषादौ अतीन्द्रियसाध्यवद्वृत्तित्वाभावस्योपनीतभानं सम्भवतीत्यत साध्यवद्वृत्तित्वाभावस्य हेतुनिष्ठतया प्रत्यक्षत्वाऽसम्भवप्रदर्शनायोभयत्रातीन्द्रियत्वमुक्तमिति ध्येयम् । अतिप्रसंगे हेतुमाह **तत्रेति** । अतीन्द्रियसाध्यकातीन्द्रियव्यभिचारिणि हेतावित्यर्थः । **प्रत्यक्षत्वासम्भवेनेति** । अत्यन्ताभावप्रत्यक्षेऽधिकरणयोग्यत्वस्य प्रतियोगियोग्यत्वस्य च तन्त्रत्वादिति हृदयम् ।

असिद्धेरिति । हेतौ वर्त्तमानस्य तादृशवृत्तित्वाभावस्य प्रमाणासिद्धत्वादित्याशयः । साध्यस्यातीन्द्रियत्वं हेतोश्चातीन्द्रियत्वं प्रदर्श्य व्यभिचारिस्थलमाह-टीकायां **मनस्त्ववदिति** । तथा च मनस्त्ववदणुत्वादित्यत्र हेत्वधिकरणाण्वत्रच्छेदेन मनस्त्ववद्वृत्तित्वाभावस्याणुत्वे प्रमाणाऽसिद्धतया तादृशवृत्तित्वाऽभावाधिकरणघटादिभिन्नत्वस्याऽणुत्वे सत्त्वेन भवत्यतिव्याप्तिरितिभावः । प्र-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्। तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात् ॥

❀ जागदीशी ❀

पृथिवीत्ववदित्यनुमानेनैव तत्र सामानाधिकरण्याभावः सेत्स्यतीत्यत आह– न चेति। तद्वद्वृत्तीति। साध्यवद्वृत्तिभिन्नत्वस्येत्यर्थः। तथा चोक्तानुमाने मनस्त्ववद्वृत्तिभिन्नत्वमुपाधिः, तस्य च साध्यव्यापकत्वं घटत्वादौ साधनाव्यापकत्वं द्रव्यत्वादौ ग्राह्यम्। भेदस्याप्यव्याप्यवृत्तित्वे तु साध्यवद्वृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूट उपाधिर्बोध्यः। ननूक्तोपाध्यप्रतिसन्धानदशायामु-

❀ विवृतिः ❀

त्यत्ताऽसम्भवेऽपीति। अणुत्वादौ मनस्त्वादिमद्वृत्तित्वाभावस्येत्यादिः। **मनस्त्वेति**। मनोनिरूपितवृत्तित्वाभाववदित्यर्थः।

पृथिवीत्ववदिति। न चाणुत्वरूपपक्षान्तर्भावेणोक्तहेतुसाध्ययोः व्याप्तिग्रहत्वाऽसम्भवेन कथमियमनुमितिरिति वाच्यम्। यो यदभाववद्वृत्तित्ववान् स हेत्वधिकरणावच्छेदेन तद्वद्वृत्तित्वाभाववान् यथा धूमादिसाध्यकवह्न्यादिरित्याकारकसामान्यव्याप्त्यभिप्रायेण तथाविधानुमितेरभिहितत्वात्। तत्र—अणुत्वे। **सामानाधिकरण्याभाव इति**। मनस्त्वेत्यादिः। **तस्य चेति**। उपाधेरित्यर्थः। मनस्त्ववद्वृत्तिभिन्नत्वस्योपाधित्वं घटयति **साध्येति**। मनस्त्ववद्वृत्तित्वाभावरूपसाध्यव्यापकत्वम्।

घटत्वादाविति। आदिना पटत्वादिपरिग्रहः। द्रव्यत्वादावित्यत्रापि आदिपदात् सत्तादिपरिग्रहः। **ग्राह्यमिति**। निश्चितमित्यर्थः। तथा च मनोनिरूपितवृत्तित्वाभावरूपसाध्यस्य उभयवादिसिद्धत्वं घटत्वपटत्वादौ, तत्र च मनोनिरूपितवृत्तिभिन्नत्वोपाधेः सत्त्वेन साध्यव्यापकत्वम्, मनस्त्वाभाववद्वृत्तित्वस्य द्रव्यत्वादावुभयवादिसिद्धत्वेऽपि तत्र मनोवृत्तिभिन्नत्वरूपोपाधेर्विरहेण तादृशोपाधेः साधनाव्यापकत्वमिति भावः।

ननु मनोवृत्तिभिन्नत्वस्याव्याप्यवृत्तित्वे कथं तस्य मनस्त्वाभाववद्वृत्तित्वरूपसाधनाव्यापकत्वं निरुक्तसाधनवति द्रव्यत्वादौ घटाद्यवच्छेदेन मनोवृत्तिभिन्नत्वस्य सत्त्वेन तस्य तद्व्यापकत्वानपायादित्यत आह—**भेदस्येति**। मनस्त्ववद्वृत्तिभेदादेरित्यर्थः। तेन घटादिव्यक्तिभेदस्य कथमपि अव्याप्यवृत्तित्वाऽसम्भवेऽपि न क्षतिः। अव्याप्यवृत्तित्वे तु = अवच्छिन्नवृत्तिकत्वे तु।

साध्यवदिति। मनस्त्ववद्वृत्तित्वोपलक्षितं यद्यत् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूट इत्यर्थः। मनोवृत्तियत्किञ्चित्सत्तादिव्यक्तिभेदस्य द्रव्यत्वे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

किञ्च इदमिदानीमिति प्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः।

❀ जागदीशी ❀

क्तानुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिस्तत्र भविष्यति। अन्यथा व्याप्त्यन्तरस्यापि तत्रातिप्रसङ्गादित्यत आह—किं चेति। इदमित्यादि। तथाच कालो गोमान् गोत्वादित्यादौ कालिकसम्बन्धेन हेतावव्याप्तिः, कालिकसम्ब-

❀ विवृतिः ❀

सत्त्वात् उपाधेः साधनव्यापकत्वापत्तिवारणाय तादृशभेदकूटस्योपाधित्वमुक्तम्। तथा च मनस्त्वाभाववद्वृत्तित्वरूपसाधनवति द्रव्यत्वे मनोवृत्तितत्तद्व्यक्तित्वावच्छिन्नभेदकूटान्तर्गतस्य द्रव्यत्वव्यक्तिभेदस्य विरहान्नोपाधेः साधनव्यापकत्वमितिभावः। उक्तोपाध्येति। मनोवृत्तिभिन्नत्वरूपोपाधेरज्ञानदशायामित्यर्थः। उक्तानुमानादेव = उक्तानुमापकहेतुत एव। साध्यवद्वृत्तित्वाभावसिद्धिः = मनस्त्ववद्वृत्तित्वाभावस्य सिद्धिः। तत्र = मनस्त्वसाध्यकाणुत्वे। अन्यथा = मनस्त्ववद्वृत्तित्वाभावस्यासिद्धौ। व्याप्त्यन्तरस्य = साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वरूपस्य व्याप्त्यन्तरस्य। तत्र = मनस्त्वसाध्यकाणुत्वे।

अतिप्रसङ्गादिति। अयं भावः—साध्यव्यापकत्वेन साधनाऽव्यापकत्वेन उपाधेर्ज्ञानस्य सार्वत्रिकत्वे मानाभावः, तथा च यदा तादृशोपाधेर्ज्ञानमेव नास्ति तदाऽणुत्वं मनोवृत्तित्वाभाववत् मनस्त्वाभाववद्वृत्तित्वादित्याकारकानुमानेनावश्यं अणुत्वे मनस्त्ववद्वृत्तित्वाभावस्य सिद्धिर्वाच्या, अन्यथा तस्यासिद्धौ प्रतिबन्धकाभावेन मनस्त्ववद्वृत्तित्वरूपसाध्यसामानाधिकरण्यस्याणुत्वे ज्ञायमानतया तत्र तदवच्छेदकरूपवत्त्वरूपव्याप्तेः सत्त्वात् साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वरूपव्याप्तिलक्षणस्य तत्रातिव्याप्तिः। मनस्त्ववद्वृत्तित्वाभावस्य सिद्धौ तु तत एव प्रतिबन्धकात् मनस्त्ववद्वृत्तित्वरूपस्य साध्यसामानाधिकरण्यस्याणुत्वे ज्ञानासम्भवेन तत्र तादृशव्याप्तिसत्त्वे प्रमाणाभावात् नातिव्याप्तिरिति।

दीधितौ **इदमित्यादि।** इदं वस्तु इदानीं वर्तते इत्याकारकप्रतीतिप्रयोजकीभूतोऽव्याप्यो वा यो विशेषणताविशेषः कालिकसम्बन्धस्तेन कालिकसम्बन्धेनेत्यर्थः। कालिकसम्बन्धेन हेतुसाध्यभावं प्रदर्शयितुमाह टीकायां **तथा चेति। गोत्वादिति।**

❀ मनोरमा ❀

तथा च कालो गोमान् गोत्वादिति। न च महाकालावच्छेदेन गवा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

न्धेन हेतुमति महाकाले तेन सम्बन्धेन कालवृत्तित्वाभावस्य कुत्राप्यसत्त्वात्। न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिः, कालस्य गगनाद्यनधिकरणत्वेन तन्निष्ठवृत्तित्वाभावे कालावच्छेद्यत्वा-

❀ विवृतिः ❀

न च गोत्वस्य कालिकेन प्रलयेऽपि विद्यमानतया तत्र तेन सम्बन्धेन गवादिविरहेण कथमुक्तहेतोः सद्धेतुत्वमिति वाच्यम्, प्रलयान्यगोत्वस्य हेतुत्वेन विवक्षितत्वात्। इत्यादावित्यत्रादिपदेन जन्यघटादेरपि परिग्रहसम्भवेन तस्यापि कालिकसम्बन्धेन हेतुत्वे क्षत्यभावात्। अव्याप्तिमुपपादयति कालिकसम्बन्धेनेति। महाकाले इति सप्तम्यर्थोऽवच्छेदकत्वं तस्य कालवृत्तित्वाभावेऽन्वयः। तेन सम्बन्धेन = कालिकसम्बन्धेन। तृतीयार्थावच्छिन्नत्वस्य कालवृत्तित्वेऽन्वयः। कुत्राप्यसत्त्वादिति। तथा च कालिकेन गोत्वाधिकरणमहाकालावच्छेद्यस्य गवादिमत्कालादिनिरूपितकालिकसम्बन्धावच्छिन्नवृत्तित्वाभावस्याप्रसिद्ध्या तादृशाभावाधिकरणभिन्नत्वमादाय गोत्वे लक्षणसमन्वयासम्भवात्। गोमान् गोत्वादित्यत्राव्याप्तिरिति भावः।

कालिकसम्बन्धेनापि गगनादेरवर्तमानत्वमभिप्रेत्य शङ्कते—न चेति। प्रसिद्धिरिति परेणान्वयः। साध्यवद्वृत्तित्वाभावस्य = गवादिमत्कालवृत्तित्वाभावस्य। प्रसिद्धिरिति। तथा च तादृशवृत्तित्वाभावाधिकरणगगनभिन्नत्वमादायैव कालो गोमान् गोत्वादित्यादौ लक्षणसमन्वयसम्भवान्नाव्याप्तिरितिभावः।

समाधत्ते कालस्येति। गगनाद्यनधिकरणत्वेनेति। केनापि सम्बन्धेनेत्यादिः। तन्निष्ठवृत्तित्वाभावे = गगननिष्ठसाध्यवद्वृत्तित्वाभावे। कालावच्छेद्यत्वाऽसम्भवादिति। तथा च कालावच्छेद्यस्य साध्यवद्वृत्तित्वाऽभावस्याप्रसिद्धिरेवेति भावः। ननु गोत्वादेरपि समानकालीनत्वादिसम्बन्धेन कालादौ वर्तमानतया कालादेः गगननिष्ठस्य गवादिमत्कालिकावच्छिन्नवृत्तित्वाभावस्यावच्छेकत्वं सुघटमेवेति कथं हेत्वधिकरणावच्छेद्यस्य तादृशवृत्तित्वाभावस्याप्रसिद्धि-

❀ मनोरमा ❀

दिमन्महाकालादिनिरूपितकालिकावच्छिन्नवृत्तित्वाभावस्य महाकाले विद्यमानत्वे बाधकाभावः, महाकालस्यावृत्तित्वात् तादात्म्यसम्बन्धेन महाकाले महाकालसम्बन्धित्वस्यापि सत्त्वादिति कथमुक्तस्थलेऽव्याप्तिरिति वाच्यम्। महाकालस्य जगदाधारतया महाकाले महाकालस्यापि कालिकेन वर्त्तमानत्वादिति संक्षेपः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ दीधितिः ❀

तेन सम्बन्धेनाधिकरणेकाले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः । ❀ इति सिंहव्याघ्रदीधितिः ❀

❀ जागदीशी ❀

संभवात्, कालिकसम्बन्धेन गगनादेर्वृत्तिमत्त्वस्वीकाराच्च । यद्यपि गोत्वाद्यधिकरणतत्तत्क्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्तत्क्षणासमानकालीने तत्तत्क्षणगोचरज्ञाने प्रसिद्धिः तत्तत्क्षणस्यापि विषयतया स्वविषयकज्ञानाधिकरणतया तन्निष्ठतादृशवृत्तित्वाभाववत्तायामवच्छेदकत्वसम्भवात् ।

❀ विवृतिः ❀

रत आह—**कालिकसम्बन्धेनेति** । गगनादेरित्यादिना आत्मादेरुपग्रहः । तथा च साध्यवत्कालादिनिरूपितकालिकादिसम्बन्धावच्छिन्नवृत्तित्वस्यैव गगनादौ सत्त्वेन कालावच्छेदेनापि तदभावस्य तत्र अवर्तमानतया तादृशवृत्तित्वाभावस्याऽप्रसिद्धिरित्येवाशयः । **स्वीकाराच्चेति** । कालस्य जगदाधारत्वप्रवादरक्षार्थमिति भावः ।

नन्वेवमपि हेत्वधिकरणावच्छेद्यसाध्यवद्वृत्तित्वाभावाऽप्रसिद्ध्या उक्तस्थलेऽव्याप्त्यभिधानमसंगतं कालिकेन गोत्वरूपहेत्वधिकरणीभूततत्तत्क्षणाऽसमानकालीने तत्तत्क्षणविषयकज्ञाने तादृशक्षणावच्छेदेन साध्यीभूतगवादिमत्कालवृत्तित्वाभावस्य प्रसिद्धत्वादित्याशंकते **यद्यपीति** । तत्तत्क्षणविषयकज्ञानस्य कालिकसम्बन्धेन तत्तत्क्षणेऽवर्तमानत्वसूचनाय तत्तत्क्षणाऽसमानकालीनेइत्युक्तम् । तत्तत्क्षणगोचरज्ञाने = हेत्वधिकरणीभूततत्तत्क्षणविषयकज्ञाने ।

प्रसिद्धिरिति । कालवृत्तित्वाभावस्येति पूर्वेणान्वयः । ननु हेत्वधिकरणीभूततत्तत्क्षणासमानकालीनतत्तत्क्षणविषयकज्ञानस्य केनापि सम्बन्धेन तत्तत्क्षणेऽवर्तमानतया कथं तादृशज्ञाने वर्त्तमानस्य कालवृत्तित्वाऽभावस्यावच्छेदकत्वं हेत्वधिकरणीभूततत्तत्क्षणस्य सम्भवति तदधिकरणस्यैव तद्वृत्तिधर्मावच्छेदकत्वनियमस्य पूर्वमुक्तत्वादतआह **तत्तत्क्षणस्यापीति** । हेत्वधिकरणतत्तत्क्षणस्यापीत्यर्थः । विषयतया = विषयतासम्बन्धेन । स्वविषयकज्ञानाधिकरणतया = तत्तत्क्षणविषयकज्ञानाधिकरणतया ।

तन्निष्ठेति । तत्तत्क्षणविषयकज्ञाननिष्ठे कालवृत्तित्वाभावेऽवच्छेदकत्वसम्भवादित्यर्थः । विभिन्नकालीनवस्तुनोः विषयत्वविषयित्वातिरिक्तसम्बन्धेनैवाधाराधेयभावो नाभ्युपगम्यते, विषयतासम्बन्धेन तत्तत्क्षणासमानकालीनतत्तत्क्षण-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❋ जागदीशी ❋

तथापि महाकाल एव कालिकसम्बन्धेनाधिकरणम्, उपाधीनां तु तद्वृत्तितायामवच्छेदकत्वमात्रमिति प्राचीनसिद्धान्तमनुसृत्येदम्।

महाकालनिरूपितविशेषणतया वा हेतावव्याप्तिर्द्रष्टव्या, इदमिदानीमित्याकारकप्रतीतिनियामकविशेषणतायां यो विशेषस्तेन हेतुतायामिति

❋ विवृतिः ❋

विषयकज्ञानस्य भिन्नकालीनस्यापि अधिकरणतायाः तत्तत्क्षणरूपहेत्वधिकरणवृत्तित्वे न किमपि बाधकम् इति तादृशज्ञाननिष्ठस्य कालवृत्तित्वाभावस्यावच्छेदकत्वं तत्तत्क्षणरूपहेत्वधिकरणे प्रसिद्धमेवेति हृदयम्।

उत्तरयति तथापीति। महाकाल एवेति। एवकारेण तत्तत्क्षणादेः कालिकसम्बन्धेनाधिकरणत्वव्यवच्छेदः। उपाधीनां = तत्तत्क्षणादीनाम्। तद्वृत्तितायां = महाकालवृत्तितायां। अवच्छेदकत्वमात्रमिति। 'इदानीं घट' इत्यादिप्रतीतिस्तु एतत्क्षणावच्छेदेन महाकालवृत्तित्वमेव घटादाववगाहते इति भावः। इदं = गोमान् गोत्वादित्यादावव्याप्तिदानम्। तथा च महाकालाऽसमानकालीनवस्तुनोऽप्रसिद्ध्या कालिकसम्बन्धेन गोत्वरूपहेतोरधिकरणमहाकालमात्रावच्छेदेन कालिकसम्बन्धावच्छिन्नगवादिमन्महाकालवृत्तित्वाभावस्याप्रसिद्ध्या भवति गोमान् गोत्वादित्यत्राऽव्याप्तिरिति भावः।

ननु पटादिध्वंसविशिष्टः क्षणः पटादिमदन्य इत्यपि प्रतीत्या क्षणादेरपि कालिकसम्बन्धेनाधिकरणतायाः स्वीकरणीयतयोक्तप्राचीनमतं न युक्तिसहम् इत्यत आह—महाकालेति। महाकालानुयोगिककालिकसम्बन्धेनेत्यर्थः। हेतुतावच्छेदकीभूतमहाकालानुयोगिककालिकसम्बन्धेन गोत्वाधिकरणतायाः महाकाले एव सत्त्वेन तादृशमहाकालावच्छेद्यमहाकालानुयोगिककालिकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावस्याप्रसिद्धत्वादव्याप्तिरिति भावः। ननु 'इदमिदानीमित्यादि दीधितिग्रन्थेन कालिकसम्बन्धस्यैव हेतुतावच्छेदकसंसर्गत्वबोधनात् कथमुक्तसम्बन्धस्य हेतुतावच्छेदकत्वं सम्भवतीत्यत आहेदमित्यादिति। कालिकसम्बन्धे इत्यर्थः। यो विशेषः = यो महाकालानुयोगिकत्वविशेषणावच्छिन्नकालिकसम्बन्धः। इति व्याख्यया = इत्याकारकदीधितिव्याख्यया। तादृशविशेषणतायाः = महाकालानुयोगिककालिकविशेषणतायाः। तथा च महाकालानुयोगिककालिकसम्बन्धेन हेतुतायामव्याप्तावेव दीधितिकृतस्तात्पर्य्यमिति हृदयम्।

यदि च विशेषणताविशेष एव कालिकसम्बन्धो न तु विशेषणतात्मकस्तदा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

व्याख्यया तादृशविशेषणतायाः प्राप्तेः । सामान्यत एव विभिन्नकालीनयोर्नाधाराधेयभाव इति मते नानुपपत्तिगन्धोपि ।

क्षणानां स्वासमानकालीनज्ञानस्य विषयतयाप्यनधिकरणत्वेन तदवच्छेदेन ज्ञाने साध्यवद्वृत्तित्वाभावप्रसिद्ध्यसम्भवादिति ध्येयम् ॥

अत्र हेतुतावच्छेदकसम्बन्धेन स्वाधिकरणे स्वनिरूपितहेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य विवक्षायां न कोपि दोषः । साध-

❀ विवृतिः ❀

उक्तव्याख्ययाऽपि महाकालानुयोगिककालिकसम्बन्धस्याप्राप्तेराह—**सामान्यत एवेत्यादिः** । विषयित्वविषयत्वातिरिक्तत्वमनिवेश्य सम्बन्धसामान्य एव विभिन्नकालीनवस्तुनोः नाधाराधेयभाव इत्यर्थः । ज्ञातो नष्टः घट इत्यादि प्रतीत्या नष्टघटादेरपि ज्ञानविषयतायाः आनुभविकत्वानुमते इत्युक्तम् ।

नानुपपत्तिगन्धोपीत्यत्र हेतुमाह—**क्षणानामिति** । कालिकेन गोत्वाधिकरणतत्तत्क्षणानामित्यर्थः । स्वासमानकालीनज्ञानस्य = तत्तत्क्षणाऽसमानकालीनज्ञानस्य, विषयतयापि = विषयतासम्बन्धेनापि । तदवच्छेदेन = हेत्वधिकरणतत्तत्क्षणावच्छेदेन । ज्ञाने = कालादिगोचरज्ञाने । **साध्यवद्वृत्तीति** । गवादिमत्कालवृत्तित्वाभावस्य प्रसिद्ध्यसम्भवादित्यर्थः । तथा च विभिन्नकालीनवस्तुनः केनापि सम्बन्धेनाधाराधेयभावस्यानभ्युपगन्तव्यतया तत्तत्क्षणाऽसमानकालीनतत्तत्क्षणगोचरज्ञानस्याप्रसिद्ध्या तत्तत्क्षणाऽसमानकालीनकालादिगोचरज्ञानस्यापि विषयतासम्बन्धेनाधिकरणत्वस्य क्षणादौ विरहेण तादृशक्षणादौ निरुक्तज्ञानवृत्तिधर्मावच्छेदकत्वाऽसम्भवात् । तत्तत्क्षणावच्छिन्नस्यापि साध्यवत्कालवृत्तित्वाभावस्याऽप्रसिद्धतया कालो गोमान् गोत्वादित्यत्राव्याप्तेरशक्यपरिहारत्वात् सार्वभौममतं न युक्तमित्याशयः ।

सार्वभौममतस्य निर्दोषत्वं प्रदर्शयतां भवानन्दतर्कवागीशानां मतमुत्थापयति—**अत्रेति** । निरुक्तसार्वभौमलक्षणे इत्यर्थः । न कोऽपि दोषइति परेणान्वयः । स्वाधिकरणे = तत्तद्धेत्वधिकरणे । **स्वनिरूपितेति** । तत्तद्धेतुप्रतियोगिकहेतुतावच्छेदकसम्बन्धेनेत्यर्थः । अवच्छिन्नत्वं तृतीयार्थः । तस्य च साध्यवद्वृत्तित्वाभावप्रतियोगिनि वृत्तित्वेऽन्वयः । **विवक्षायामिति** । तथा च हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणावच्छेद्यो यो हेतुप्रतियोगिकहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वं लक्षणार्थ इति भावः । निरुक्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

नीभूतगोत्वाधिकरणमहाकालावच्छेदेन गोत्वनिरूपितकालिकसम्बन्धेन साध्यवद्वृत्तित्वाभावस्य घटादावेव प्रसिद्धत्वात्। साध्यसामानाधिकरण्यत्वं यद्धर्मावच्छिन्नाधिकरणावच्छेद्यहेतुवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं विवक्षितम्।

❀ विवृतिः ❀

विवक्षायामुक्तामव्याप्तिमुद्धरति—**साधनीभूतेति**। गोत्वनिरूपितकालिकसम्बन्धेन = गोत्वप्रतियोगिककालिकसम्बन्धेन। साध्यवद्वृत्तित्वाभावस्य = गवादिमत्कालवृत्तित्वाभावस्य।

घटादावेवेति। एवकारोऽप्यर्थे। घटादावपीत्यर्थः। घटत्वादेर्व्यवच्छेदाऽसम्भवात्। **प्रसिद्धत्वादिति**। तथा च कालिकेन गोत्वाधिकरणमहाकालावच्छेद्यस्य गोत्वप्रतियोगिककालिकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावस्याधिकरणीभूतघटादिभिन्नत्वस्य गोत्वे सत्त्वान्न गोमान् गोत्वादित्यत्राऽव्याप्तिरिति भावः।

ननु निरुक्तव्याप्तेः स्वत्वघटितत्वेन तत्तद्व्यक्तिविश्रामस्यावश्यकतया धूमसामान्ये वह्निसामान्यस्यैका व्याप्तिरिति व्यवहारो न स्यादत आह—**साध्यसामानाधिकरण्यत्वमिति**। साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्ननिरूपकताकाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वत्वमित्यर्थः। तेन न समवायेन वह्न्यधिकरणनिरूपितसंयोगसम्बन्धावच्छिन्नवृत्तित्वाभावस्य महानसीयवह्न्यधिकरणनिरूपिततादृशवृत्तित्वाभावस्य च धूमाद्यधिकरणपर्वतावच्छेदेन धूमादिनिष्ठत्वेऽपि वह्निमान् धूमादित्यत्राव्याप्तिः; न वा संयोगेन वह्न्यधिकरणनिरूपितसमवायावच्छिन्नपर्वतवृत्तित्वाभावस्य पर्वताद्यवच्छेदेन धूमादिनिष्ठत्वेऽपि तत्राऽव्याप्तिः।

यद्धर्मेत्यादिः। यादृशहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणावच्छेद्यो यो हेतुनिष्ठात्यन्ताभावस्तत्प्रतियोगितानवच्छेदकं भवतीत्यर्थः। तद्धर्मवत्त्वं = तादृशहेतुतावच्छेदकवत्त्वम्। अस्ति च यद्धर्मपदेन धूमत्वादिकमादाय वह्निमान् धूमादित्यादौ लक्षणसमन्वयः। संयोगेन धूमत्वावच्छिन्नाधिकरणपर्वतावच्छेदेन धूमनिष्ठात्यन्ताभावो घटाद्यभाव एव न तु वह्निसामानाधिकरण्याभावः, धूमादौ वह्निसामानाधिकरण्यस्यैव सत्त्वात् इति तादृशघटाभावप्रतियोगितानवच्छेदकतायाः वह्निसामानाधिकरण्यत्वेऽक्षतत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ विवृतिः ❀

धूमवान् वह्नेरित्यादौ तु वह्नित्वावच्छिन्नसंयोगावच्छिन्नाधिकरणायःपिण्डावच्छेदेन वह्नौ धूमसामानाधिकरण्याभावस्य सत्त्वेन तत्प्रतियोगितावच्छेदकत्वस्यैव धूमसामानाधिकरण्यत्वनिष्ठतया यद्धर्मपदेन वह्नित्वस्य धर्तुमशक्यत्वान्नातिव्याप्तिः।

कालो गोमान् गोत्वादित्यादौ च कालिकसम्बन्धावच्छिन्नगोत्वत्वावच्छिन्नस्याधिकरणमहाकालावच्छेदेन गोत्वे गवादिमत्कालवृत्तित्वाभावासत्त्वेन तत्र वर्त्तमानस्य घटाद्यभावस्य प्रतियोगिताऽनवच्छेदकतायाः गवादिमत्कालवृत्तित्वत्वरूपसाध्यसामानाधिकरण्यत्वे वर्त्तमानतया नाऽव्याप्तिः। यद्धर्मावच्छिन्नाधिकरणावच्छेद्यत्वस्य हेतुनिष्ठात्यन्ताभावाऽविशेषणत्वे व्यभिचारिणि धूमवान् वह्नेरित्यादावतिव्याप्तिः, वह्न्यादौ धूमसामानाधिकरण्याभावस्याऽसत्त्वेन हेतुवृत्तिकघटाद्यभावप्रतियोगितानवच्छेदकतायाः धूमसामानाधिकरण्यत्वे विद्यमानत्वादतोऽवच्छेद्यान्तम्।

यदधिकरणावच्छेद्यत्वमात्रोक्तौ अनुगतव्याप्तेरलाभः द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिश्च, केवलसत्त्वाधिकरणगुणावच्छेदेन द्रव्यत्वसामानाधिकरण्याभावस्य विशिष्टसत्तावृत्तिकस्य प्रतियोगितावच्छेदकतायाः द्रव्यत्वसामानाधिकरण्यत्वे सत्त्वात् समवायेन धूमाधिकरणधूमावयवावच्छेदेन वह्निसामानाधिकरण्याभावस्य धूमनिष्ठतयाऽभावप्रतियोगितावच्छेदकतायाः वह्निसामानाधिकरण्यत्वे वर्त्तमानत्वात् वह्निमान् धूमादित्यत्राव्याप्तिरतो यद्धर्मावच्छिन्नाधिकरणतायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशः।

हेतुवृत्तिकात्यन्ताभावश्च स्वरूपेणैव हेतौ वर्त्तमानः स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको बोध्यः। तेन न वह्निमान् धूमादित्यादौ धूमवत्पर्वतावच्छेदेन स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्निसामानाधिकरण्याभावस्य कालिकसम्बन्धेन धूमनिष्ठत्वेप्यव्याप्तिर्न वा द्रव्यं घटत्वादित्यादौ घटावच्छेदेन कालिकसम्बन्धावच्छिन्नद्रव्यत्वसामानाधिकरण्याभावस्य स्वरूपसम्बन्धेन घटत्वादिनिष्ठत्वेऽप्यव्याप्तिः। वह्न्यादिवृत्तित्वविशिष्टस्य वह्निसामानाधिकरण्यस्याभावस्य वह्निसामानाधिकरण्यत्वघटोभयाभावस्य हेतुमत्पर्वतावच्छेदेन धूमादौ वर्त्तमानतया हेतुवृत्तिकात्यन्ताभावाऽप्रतियोगितायाः वह्निसामानाधिकरण्ये विरहात् वह्निमान् धूमादित्यादावव्याप्तिरतः प्रतियोगितानवच्छेदकत्वानुसरणम्।

न च तथापि वह्निमान् धूमादित्यादौ धूमत्वावच्छिन्नाधिकरणपर्वतावच्छेदेन महानसीयधूमादौ वह्निसामानाधिकरण्याभावसत्त्वादव्याप्तिरिति वाच्यम्। हेतुताव्यापकात्यन्ताभावस्य विवक्षणीयत्वादिति ध्येयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

इत्थं च वाच्यं प्रमेयादित्यादौ प्रमेयव्यक्तीनां भेदेपि न व्याप्तेर्भेद इत्यस्मद्गुरुचरणाः ।

केचित्तु स्वनिष्ठं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद्यतदभावाधिकरणभिन्नत्वमित्यर्थः, तथा च तादृशाभावाधिकरणत्वं सद्धेतुस्थले स्वभिन्नव्यक्तावेव प्रसिद्धमतो नाव्याप्तिरित्याहुः ।

❀ विवृतिः ❀

इत्थं चेति । निरुक्तरीत्या लक्षणार्थनिर्वचने चेत्यर्थः । प्रमेयव्यक्तीनां = पटघटादीनाम् । प्रमाव्यक्तिभेदेनापि प्रमेयत्वस्यानुगतत्वमभिप्रेत्याह—न व्याप्तेर्भेद इति । न प्रमेयत्वरूपव्याप्तेर्भेदः, रीतिरुक्तैव ।

कालो गोमान् गोत्वादित्यादावव्याप्तिवारणाय सार्वभौमलक्षणमन्यथा व्याचक्षाणानां केषाचिन्मतमाह केचित्त्विति । स्वनिष्ठमित्यादि । स्वपदं तत्तद्धेतुपरं तथा च हेत्वधिकरणावच्छिन्नो यः स्ववृत्तित्वविशिष्टस्य साध्यवद्वृत्तित्वस्याभावस्तदधिकरणभिन्नत्वं स्वस्मिन् व्याप्तिरिति समुदिततात्पर्य्यम् । गोमान् गोत्वादित्यत्राव्याप्तिवारणाय स्वनिष्ठत्वं साध्यवद्वृत्तित्वविशेषणं; तथा च न तत्राव्याप्तिः, गोत्वाधिकरणमहाकालावच्छेदेन गोत्ववृत्तित्वविशिष्टस्य गवादिमत्कालवृत्तित्वस्याभावस्याधिकरणीभूतघटादिभिन्नत्वस्य गोत्वे सत्त्वात् । स्वनिष्ठत्वं च विशेषणं न तूपलक्षणम् । तेन गोत्वाधिकरणमहाकालावच्छेदेन गोत्वोपलक्षितगवादिमत्कालवृत्तित्वस्य सर्वत्र सत्त्वेन तदभावाऽप्रसिद्ध्या न गोमान् गोत्वादित्यत्राव्याप्तिः ।

वह्निमान् धूमादित्यादौ धूमाधिकरणपर्वतावच्छेदेन पर्वतीयधूमादिवृत्तित्वविशिष्टस्य वह्निमत्संयुक्तत्वस्य धूमादिवृत्तित्वविशिष्टस्य वा तस्याभावाधिकरणतायाः महानसीयधूमे पर्वतीयरूपादौ च प्रसिद्धतया तादृशमहानसीयधूमादिभिन्नत्वस्य रूपादिभिन्नत्वस्य च पर्वतीयधूमादावक्षतत्वाल्लक्षणसमन्वय इत्याह तादृशेति । हेत्वधिकरणावच्छेद्यस्वनिष्ठसाध्यवद्वृत्तित्वाभावाधिकरणत्वं त्वित्यर्थः । सद्धेतुस्थले = वह्निमान् धूमादित्यादौ सर्वत्र । स्वभिन्नव्यक्तावेव = प्रकृतहेतुभिन्नव्यक्तावेव । नाव्याप्तिः = न कालो गोमान् गोत्वादित्यत्राव्याप्ति । धूमवान् वह्नेरित्यादौ वह्न्यधिकरणायोगोलकावच्छेदेन वह्निवृत्तित्वविशिष्टस्य धूमवद्वृत्तित्वस्याभावाधिकरणतायाः वह्नौ सत्त्वेन नातिव्याप्तिरन्यत् सर्वं पूर्ववदिति संक्षेपः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

-साध्यवद्वृत्तित्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्वयदधिकरणावच्छे-

❀ विवृतिः ❀

मतान्तरमाह **साध्यवद्वृत्तीत्यादि ।** साध्यतावच्छेदकसम्बन्धेन प्रकृतसाध्याधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावाधिकरणतात्व-व्यापकीभूतो यो यद्धेतुनिष्ठत्व-हेतुतावच्छेदकसम्बन्धावच्छिन्नयद्धेत्वधिकरणावच्छेद्यत्वोभयाभावस्तत्त्वं व्याप्तिरित्यर्थः । तेन न कोऽपि दोषः । गोमान् गोत्वादित्यादौ गगनादिनिष्ठे साध्यीभूतगवादिकालवृत्तित्वाभावाधिकरणत्वसामान्ये एव गोत्वनिष्ठत्वगोत्वाधिकरणमहाकालावच्छेद्यत्वयोर्द्वयोरभावसत्त्वाल्लक्षणसमन्वयः । अयोगोलकीयरूपादिनिष्ठायां धूमवत्संयुक्तत्वाभावाधिकरणतायामयोगोलकावच्छेद्यत्वसत्त्वेऽपि वह्निनिष्ठत्वाभावेनोभयाभावस्याक्षततया धूमवान् वह्नेरित्यत्रातिव्याप्तिरतः साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये इत्युक्तम् । तथा चायःपिण्डाव-

❀ मनोरमा ❀

साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये इति । अधिकरणभेदेनाऽभावस्य भेदानभ्युपगमे पर्वतीयरूपादौ वर्त्तमाने वह्निमत्संयुक्तत्वाभावे धूमनिष्ठत्व—पर्वतावच्छेद्यत्वयोर्द्वयोः सत्त्वात् वह्निमान् धूमादित्यादावव्याप्तिरतः साध्यवद्वृत्तित्वाभावसामान्ये इत्यनुक्त्वा साध्यवद्वृत्तित्वाभावाधिकरणसामान्ये इत्युक्तम् । तथा चाधिकरणताया अधिकरणभेदेन नानात्वान्न दोष इति ध्येयम् ।

यन्निष्ठत्वयदधिकरणावच्छेद्यत्वोभयाभाव इति । यद्धर्मावच्छिन्ननिष्ठत्वयद्धर्म्मावच्छिन्नाधिकरणावच्छेद्यत्वोभयाभाव इत्यर्थः । तेन महानसीयधूमे धूमवत्पर्वतावच्छेदेन वह्निमत्संयुक्तत्वाभावसत्त्वेऽपि न वह्निमान् धूमादित्यादावव्याप्तिः । निरुक्तसंयुक्तत्वाभावाधिकरणतायां महानसीयधूमादिनिष्ठायां धूमत्वावच्छिन्ननिष्ठत्वाभावस्याक्षतत्वात् । एवम् अग्रिमकल्पेऽपि निरुक्ताव्याप्तिवारणाय यदधिकरणावच्छेद्यत्वं यद्धर्म्मावच्छिन्नाधिकरणावच्छेद्यत्वमेव विवक्षणीयमित्यवधेयम् । न च जलं रूपादित्यत्र जलत्ववद्वृत्तित्वाभावाधिकरणतासामान्यस्यैव व्याप्यवृत्तितया तत्र हेत्वधिकरणावच्छेद्यत्वविरहात् व्याप्यवृत्तेरवच्छेदकत्वानभ्युपगमपक्षे निरुक्तस्थलेऽतिव्याप्तिसम्भवे उदक्षरत्वादिदोषाभिधानमसङ्गतमिति वाच्यम् 'रूपे तेजसि न जलवृत्तित्वमि'त्यादिप्रतीत्या रूपनिष्ठायां जलवृत्तित्वाभावाधिकरणतायां तेजोऽवच्छेद्यत्वस्याभ्युपगमादिति वदन्ति । वस्तुतो निरुक्तलक्षणे वाच्यं प्रमेयादित्यत्राव्याप्तेरेव दोषतया निरुक्तस्थलेऽतिव्याप्तिसत्त्वेऽपि न क्षतिरिति ध्येयम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

द्यत्वोभयाभावस्तत्त्वं व्याप्तिः। पर्वतीयरूपनिष्ठं यत् पर्वतावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणत्वं न तद्धूमनिष्ठं, यच्च धूमनिष्ठं न तद्धूमाधिकरणावच्छेद्यमधिकरणभेदेन तस्य नानात्वात्। अन्यथा पर्वते तदी-

❀ विवृतिः ❀

च्छिन्नधूमवत्संयुक्तत्वाभावाधिकरणतायां वह्निनिष्ठायां तादृशसामान्यान्तर्गतायां वह्निनिष्ठत्व-वह्न्यधिकरणायःपिण्डावच्छेद्यत्वोभयसत्त्वान्न तत्रातिव्याप्तिरिति भावः। सामान्यपदस्य यावदर्थकत्वे रूपघटादिनिष्ठधूमवत्संयुक्तत्वाभावाधिकरणताश्रयमादाय तथैव धूमवान् वह्नेरित्यत्रातिव्याप्तिरतो व्यापकत्वनिवेशः। यन्निष्ठत्वाभावमात्रविवक्षणे वह्निमान् धूमादित्यत्राव्याप्तिः साध्यवद्वृत्तित्वाभावाधिकरणतासामान्यान्तर्गतायां धूमादिनिष्ठायां धूमावयवावच्छिन्नवह्निमत्संयुक्तत्वाभावाधिकरणतायां धूमनिष्ठत्वसत्त्वेन तदभावस्य तत्राऽसत्त्वात्। एवं यदधिकरणावच्छेद्यत्वाभावमात्रोक्तावपि तादृशाधिकरणतासामान्यान्तर्गतायां पर्वतीयरूपनिष्ठायां वह्निमत्संयुक्तत्वाभावाधिकरणतायां धूमाधिकरणपर्वतावच्छेद्यत्वाऽभावविरहात्तत्रैवाऽव्याप्तिरत उभयाभावनिवेशनमित्याह **पर्वतीयरूपनिष्ठमित्यादि**।

न तद्धूमनिष्ठं = तादृशाधिकरणत्वं न धूमनिष्ठम्। एतेन यदधिकरणावच्छेद्यत्वाभावमात्रनिवेशेऽव्याप्तिः सूचिता; यन्निष्ठत्वाभावमात्रनिवेशेप्यव्याप्तिमाह—**यच्चेति**। धूमावयवावच्छिन्नवह्निमत्संयुक्तत्वाभावाधिकरणत्वं चेत्यर्थः। **न तद्धूमाधिकरणावच्छेद्यं** = तादृशाधिकरणत्वं च न धूमाधिकरणपर्वताद्यवच्छेद्यमपि तु धूमावयवावच्छेद्यमेव। तथा चोभयाभावविवक्षणे न वह्निमान् धूमादित्यत्राव्याप्तिः। पर्वतावच्छेद्यपर्वतीयरूपनिष्ठायां वह्निमत्संयुक्तत्वाभावाधिकरणतायां धूमाधिकरणपर्वतावच्छेद्यत्वसत्त्वेऽपि धूमनिष्ठत्वाभावेनोभयाभावस्याक्षतत्वात् धूमनिष्ठायां धूमावयवावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणतायां च धूमनिष्ठत्वसत्त्वेऽपि पर्वतावच्छेद्यत्वविरहेणोभयाभावसत्त्वादिति भावः। पर्वतीयरूपादिनिष्ठं वह्निमत्संयुक्तत्वाभावाधिकरणत्वं यदि धूमावयवावच्छिन्नं धूमनिष्ठं वह्निमत्संयुक्तत्वाभावाधिकरणताऽभिन्नं तदोभयाभावनिवेशपक्षेऽप्यव्याप्तिवारणमशक्यमेवेत्यत **आहाधिकरणभेदेनेति**। **तस्य** = साध्यवद्वृत्तित्वाभावाधिकरणत्वस्य।

नानात्वादिति। तथा च पर्वतीयरूपनिष्ठं तादृशाधिकरणत्वं पर्वतीयरूपे एव धूमनिष्ठमपि तादृशाधिकरणत्वं धूम एवेति नाव्याप्तिरिति हृदयम्। **अन्यथेति**। अधिकरणभेदेनाप्यधिकरणताया अभिन्नत्वे इत्यर्थः। **प्रतीत्या-**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

यरूपे न वन्हिमत्संयुक्तमितिवत् पर्वते धूमे न वन्हिमत्संयुक्तत्वमित्यादि-प्रतीत्यापत्तेः, अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः ।

व्याप्यवृत्तेरवच्छेदकत्वास्वीकारे तु तादृशाभावाधिकरणत्वसामान्ये

❀ विवृतिः ❀

पत्तेरिति । धूमनिष्ठधूमावयवावच्छिन्नवह्निमत्संयुक्तत्वाभावाधिकरणतायाः पर्वतीयरूपनिष्ठपर्वतावच्छेद्यवह्निमत्संयुक्तत्वाभावाधिकरणत्वाऽभिन्नतया भवन्मते तादृशप्रतीत्यापत्तिर्दुर्वारैवेत्याशयः । अत = उभयाभावनिवेशात् । इत्यधिकमन्यत्रानुसन्धेयम् ।

ननु पर्वतीयरूपादिनिष्ठायाः वह्निमत्संयुक्तत्वाभावाधिकरणतायाः व्याप्यवृत्तितया तदवच्छेदकस्याप्रसिद्ध्या साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये केवलयदधिकरणावच्छेद्यत्वाभावनिवेशेऽपि न वह्निमान् धूमादित्यत्राव्याप्तिः धूमनिष्ठधूमावयवावच्छिन्नवह्निमद्वृत्तित्वाभावाधिकरणतायां धूमवत्पर्वतावच्छेद्यत्वाभावस्याऽक्षतत्वात् रूपादिनिष्ठायाः वह्निमत्संयुक्तत्वाभावाधिकरणतायाः सामान्यान्तर्गतत्वेऽपि तस्याः व्याप्यवृत्तित्वेन तत्र तादृशपर्वतावच्छेद्यत्वाभावसत्त्वे बाधकाभावादत आह व्याप्यवृत्तेरिति ।

अवच्छेदकत्वाऽस्वीकारे त्विति । व्याप्यवृत्तेर्निरवच्छिन्नत्वस्य सर्वानुभवसिद्धत्वादित्याशयः । तादृशेति । साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये इत्यर्थः । तथा च साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाभावाधिकरणतात्वव्यापको हेतुतावच्छेदकसम्बन्धावच्छिन्नयदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वं व्याप्तिरिति भावः ।

गगनादिनिष्ठे गवादिमत्कालवृत्तित्वाभावाधिकरणत्वे गोत्वाधिकरणमहाकालावच्छेद्यत्वविरहात् कालो गोमान् गोत्वादित्यादौ लक्षणसमन्वयः । वह्निनिष्ठायामयोगोलकावच्छिन्नधूमवत्संयुक्तत्वाभावाधिकरणतायां वह्न्यधिकरणायोगोलकावच्छेद्यत्वस्य सत्त्वेन न धूमवान्वह्नेरित्यत्रातिव्याप्तिः । घटादिनिष्ठायां रूपादिनिष्ठायां वा यत्किंचिद्धूमवत्संयुक्तत्वाभावाधिकरणतायां वह्निमदयोगोलकावच्छेद्यत्वसामान्यविरहेण धूमवान् वह्नेरित्यत्रातिव्याप्तिरतः साध्यवद्वृत्तित्वाभावाधिकरणतायामित्यनुक्त्वा तादृशाधिकरणतासामान्ये इत्युक्तम् । यथाश्रुते तादृशाधिकरणतात्रयमादाय तथैवातिव्याप्तिरतो व्यापकत्वनिवेश इत्यवधेयम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❁ जागदीशी ❁

यदधिकरणावच्छेद्यत्वसामान्याभावस्तत्त्वमित्येव वाच्यमित्यादिकं पुनरुदक्षरत्वादुपेक्षितम् । वाच्यत्वादिसाध्यके तादात्म्येन हेतावव्याप्तेश्च, वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः ।

एतेन सत्तायां कर्मणि न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतौ कर्मण इव कर्मसत्त्वयोः समवायस्याप्यवच्छेदकत्वं भासते ।

अन्यथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यादिप्रती-

❁ विवृतिः ❁

वह्निनिष्ठायामपि तत्तायःपिण्डावच्छिन्नधूमवत्संयुक्तत्वाभावाधिकरणतायां वह्निमत्पर्वतावच्छेद्यत्वाभावस्य वह्निमत्तत्तायःपिण्डावच्छेद्यत्वघटत्वोभयाभावस्य च सत्त्वेन धूमादिसाध्यकवह्न्यादावतिव्याप्तिः । अतो यदधिकरणावच्छेद्यत्वाभाव इत्यनुक्त्वा तादृशावच्छेद्यत्वसामान्याभाव उक्तः । स च यदधिकरणावच्छेद्यत्वं यत् यत् तत्तद्व्यक्तित्वावच्छिन्नाभावकूटरूप इत्यवधेयम् ।

इत्यादिकमिति । निरुक्तलक्षणद्वयमित्यर्थः । उदक्षरत्वात् = प्रकृतलक्षणवाक्याऽलभ्यत्वात् । उपेक्षितमस्माभिरितिशेषः । लक्षणादिनापि लक्षणाऽर्थस्य विवक्षाऽसम्भवादाह **वाच्यत्वादीति ।** तथा चोक्तलक्षणद्वयेऽपि वाच्यं द्रव्यादित्यादौ तादात्म्येन हेतुतायामव्याप्तिः । वाच्यत्ववत्तादात्म्यकत्वस्य केवलान्वयित्वेन व्याप्यवृत्तितया तदभावस्याप्रसिद्धेरिति भावः ।

एतेनेति । निरस्तमितिपरेणान्वयः । पूर्वोक्तोदक्षरत्वादिदोषेण वाच्यत्वादिसाध्यकतादात्म्यावच्छिन्नहेतावव्याप्तिभयेन चेत्यर्थः । सत्तायां गुणे इत्युक्तौ गुणसत्त्वयोः समवायस्यावच्छेदकत्वस्वीकारेऽपि अग्रिमदोषाऽसम्भवात् कर्मणि इत्युक्तम् । न द्रव्यत्वसामानाधिकरण्यम् = न द्रव्यत्ववद्वृत्तित्वं, कर्मणोऽवच्छेदकत्वस्योभयवादिसिद्धत्वात् तस्य दृष्टान्ततयोल्लेखः । **भासत इति ।** तथा चोक्तदृष्टान्तबलात् यत्र येन सम्बन्धेन यदधिकरणस्यावच्छेदकत्वं तत्र तत्तदधिकरणयोस्तत्सम्बन्धस्याप्यवच्छेदकत्वं भासत एवेत्याशयः । **अन्यथेति ।** उक्तप्रतीतौ कर्मसत्त्वयोः समवायस्यावच्छेदकत्वाऽभाने इत्यर्थः ।

इदानीमित्यादि । अयं भावः—सत्तायां कर्मणि इत्यादिप्रतीतिः कर्मसत्त्वयोः समवायस्य द्रव्यत्वसामानाधिकरण्याभावावच्छेदकत्वानवगाहित्वे इदानीमित्यादिप्रतीतेरुक्तप्रतीत्यभिन्नत्वापत्त्या यथा सत्तायां कर्मणि न द्रव्यत्वसामानाधिकरण्यमितिप्रतीतिस्तथा इदानीं सत्तायां न द्रव्यत्वसामानाधिकर-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

त्यापत्तेः। एतत्कालस्य कर्मानतिरेकात् । एवं च यद्धेतुव्यक्त्यधिकरणीयहेतुतावच्छेदकसम्बन्धे साध्यवद्वृत्तित्वाभावावच्छेदकत्वं नास्ति तत्त्वमित्यर्थः ।

❀ विवृतिः ❀

ण्यमित्यपि प्रतीतिः स्यात् । कर्मत्वेन कर्मावच्छेदेन सत्तायां द्रव्यत्वसामानाधिकरण्याभावस्यानुभवसिद्धतया कर्मत्वेन कर्मसत्त्वयोः समवायस्यापि तादृशाभावावच्छेदकत्वमनुभवसिद्धम् एतत्कालस्य कर्मानतिरिक्तत्वेऽपि एतत्कालत्वेन एतत्कालावच्छेदेन सत्तायां द्रव्यत्वसामानाधिकरण्यस्यैव सत्त्वेन तादृशैतत्काले तदभावावच्छेदकत्वस्यानुभवाऽसिद्धतया एतत्कालसत्त्वयोः समवायस्य कालिकस्य वा तादृशाऽभावाऽवच्छेदकत्वं नाऽनुभवसिद्धिमिति सत्तायां कर्मणीत्यादिप्रतीतेरिदानीमित्यादिप्रतीतेर्विभिन्नतया नेदानीं सत्तायां द्रव्यत्वसामानाधिकरण्यमित्याकारकप्रतीत्यापत्तिरिति । तादृशप्रतीतेः तादृशसमवायस्यावच्छेदकत्वावगाहित्वस्य प्रकृतोपयोगित्वं प्रदर्शयितुमाह—**एवञ्चेति** । तत्तदधिकरणसम्बन्धस्य सामानाधिकरण्याभावावच्छेदकत्वे चेत्यर्थः ।

यद्धेत्विति । या हेतुव्यक्तिर्यच्च तस्याधिकरणं तदुभयनिरूपितहेतुतावच्छेदकसम्बन्धसामान्ये इत्यर्थः । **तत्त्वमिति** । तथा च स्व,—स्वाधिकरणोभयनिरूपितहेतुतावच्छेदकसंसर्गत्वव्यापकप्रकृतसाध्याधिकरणवृत्तित्वाभावावच्छेदकत्वाभावकत्वं स्वस्मिन् व्याप्तिरिति भावः । धूमपर्वतादिसंयोगसामान्ये धूमधूमावयवसमवायनिष्ठस्य वह्निमत्संयुक्तत्वाभावावच्छेदकत्वस्याभावसत्त्वात् । स्वपदेन धूमादिकमादाय वह्निमान् धूमादित्यादौ लक्षणसमन्वयः ।

वह्न्ययःपिण्डसंयोगे च धूमवत्संयुक्तत्वाभावावच्छेदकत्वसत्त्वेन तदभावस्य तत्राऽसत्त्वात् न धूमवान् वह्नेरित्यादावतिव्याप्तिः, केवलसत्तासमवायस्य केवल-

❀ मनोरमा ❀

यद्धेतुव्यक्त्यधिकरणीयेति । इदन्तु लक्षणं समवायस्य नानात्वमते बोध्यम् । अन्यथा कर्म्मकर्म्मत्वादिसमवायस्य पृथिवीपृथिवीत्वसमवायात्मकतया कर्म्मत्वादिसमवायस्य द्रव्यत्ववद्वृत्तित्वाभावावच्छेदकत्वे पृथिवीत्वसमवायस्यापि तथात्वेन द्रव्यं पृथिवीत्वादित्यत्राव्याप्तिः स्यादिति संक्षेपः ॥

* इति श्रीवामाचरणभट्टाचार्य्यतर्कतीर्थन्यायाचार्य्यविरचिता मनोरमा *

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

❀ जागदीशी ❀

कालो गोमान् गोत्वादित्यादौ कालवृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वादिनिष्ठे आत्मसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसम्बन्धे विरहान्नाव्याप्तिरित्यपि निरस्तमिति संक्षेपः ।

❀ इति सिंहव्याघ्रलक्षणजागदीशी ❀

❀ विवृतिः ❀

कर्मसमवायस्य च द्रव्यत्वसामानाधिकरण्याभावानवच्छेदकत्वात् द्रव्यं सत्त्वादित्यत्रातिव्याप्तिः, अत उभयनिरूपितत्वं हेतुतावच्छेदकसम्बन्धविशेषणम्, धूमपर्वतयोः कालिकसम्बन्धस्य वह्निमत्संयुक्तत्वाभावावच्छेदकतया वह्निमान् धूमादित्यत्राव्याप्तिरतो हेतुतावच्छेदकसम्बन्धे इत्युक्तम् । वह्निपर्वतादिसंयोगस्य धूमवत्संयुक्तत्वाभावानवच्छेदकत्वात् धूमवान् वह्नेरित्यत्रातिव्याप्तिरतो व्यापकत्वपर्यन्तानुसरणमिति ध्येयम् ।

ननु साध्यीभूतगवादिमत्कालनिरूपितकालिकसम्बन्धावच्छिन्नवृत्तित्वाऽभावाऽप्रसिद्ध्या कालो गोमान् गोत्वादित्यत्राव्याप्तिवारणमसम्भवीत्यत आह— **कालवृत्तित्वेति** । द्रव्यत्वनिष्ठात्मसमवेतत्वादौ द्रव्यत्वात्मनोः समवायसम्बन्धे समवेतत्वस्य प्रतियोगितया समवायरूपत्वादन्यथा यथाश्रुते समवायावच्छिन्नतादृशवृत्तित्वस्य तादृशाभावावच्छेदकत्वे मानाभावेनासंगतिः स्यात् ।

नाऽव्याप्तिरिति । तथा च गोत्वमहाकालयोः कालिकसम्बन्धे साध्यवत्कालवृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वात्मसमवायनिष्ठस्याभावसत्त्वान्न गोमान् गोत्वादित्यत्राव्याप्तिरिति भावः ।

निरस्तमिति । निरुक्तार्थस्य लक्षणवाक्यालभ्यत्वात् वाच्यत्वसाध्यकतादात्म्यावच्छिन्नत्वहेतावव्याप्तेश्च, वाच्यत्ववत्तादात्म्यकत्वस्य केवलान्वयितया तदभावाऽप्रसिद्ध्या तदवच्छेदकत्वस्याऽप्रसिद्धेरिदमपि लक्षणमयुक्तमित्याशय इत्यास्तां विस्तरः ।

इति सर्वतन्त्रस्वतन्त्रपण्डितप्रवरश्री'वामाचरणभट्टाचार्य्य'तर्कतीर्थन्यायाचार्य्य-विरचितेयं सिंहव्याघ्रस्य विवृत्तिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विक्रेयानि संस्कृतपुस्तकानि

ब्रह्मसूत्रम्—पं० श्रीसूर्यनारायणशुक्लकृतटिप्पणीयुतम्	।)
अवच्छेदकत्वनिरुक्तिः—	≡)
कारिकावली—सिद्धान्तमुक्तावलीसहिता	॥≡)
जागदीशीसिद्धान्तलक्षणम्—विवृत्ति-दीपिका-कालीशंकरीसहितम्	१॥।)
तर्कसंग्रहः—मूलमात्रम्	-)
„ न्यायबोधिनी-पदकृत्य-भाषाटीका-प्रश्नपत्रसमन्वितः	।≡)
„ दीपिका-विवृतिसहितः	॥।)
व्याप्तिपञ्चकम्—विवृतिसहितम्	१≡)
वेदान्तसारः—गंगाटीकाविवृतिसहितः	॥≡)
सांख्यतत्त्वकौमुदी-किरणावलीसहिता, गौडपादभाष्यं च	३)
सिंहव्याघ्रलक्षणविवृतिः	॥)

प्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐन्ड सन्स

संस्कृत-बुकडिपो, कचौड़ीगली, बनारस।

Kirtikant Sharma Collection, Najafgarh